A.C. Joshi Library
P.U. Chandigarh

MSS No. 136 Subject Literature

Name of MSS व्युत्पत्ति वाद

Author – –

Period – – Folios 28 (001 to 006 + 008 to 029)

Script Sanskrit Source Prithipal Singh

Missing Folios 007

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

शक्तिर्निपुणतालोकशास्त्रकाव्याद्यवेक्षणात् काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे

Sans. MS.
850.9 (?)
V998
136-MS.

व्युत्पत्तिवाद
२८ पत्रक॥ ल० अ० १३ पं० प्र० पू०

ह० ल०

Sanskrit
850.9
V998
136-MS.
136

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

व्यु॰
१

ॐ श्रीगणेशाय नमः अथ पदार्थबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते स च क्वचिद्भे
दः क्वचित्तदतिरिक्तस्तथा धाराधेयभावप्रतियोगानुयोगिविषयविषयिभावादिः अभेदस्य प्रातिपदिकार्थे स्वसमान
विभक्तिकेन स्वाव्यवहितपूर्ववर्तिना नामपदेनोपस्थापितस्यैव संसर्गमर्यादया भासते यथा घटो नीलो ऽ
नीलघटमानयेत्यत्र घटादौ नीलादेः न तु विरुद्धविभक्तिमत्पदार्थस्य नीलस्य घट इत्यादौ नीलघटा
भेदान्वयबोधस्य सर्वानुभवविरुद्धत्वात् स्वसमानविभक्तिकत्वं च स्वप्रकृतिकविभक्तिसजातीयविभ
क्तिकत्वं साजात्यं च विभक्तिविभाजकप्रथमात्वादिना न तु समानानुपूर्वीकत्वं साजात्ये वेदाः प्रमाणं शा
ले ब्राह्मणा इत्यादावन्वयबोधानुपपत्तेः ननु द्विपात्याद्याः सदेकत्वे सर्वाः संख्येयसंख्ययोरित्यनुशास
नात्स्तुते ब्राह्मणा इत्यादेः साधुत्वेपि वेदाः प्रमाणमित्यादयः कथं प्रयोगाः विशेष्यविशेषणवाचकपदयो
स्तु विशेषानुशासने समानवचनवत्वनियमात् अन्यथा घटा नील इत्यादेरपि साधुताप्रसङ्गात् समानलि
ङ्गकस्थले तादृशनियमोपगमेन वेदाः प्रमाणमित्यादेः साधुत्वोपपादनेपि इति हेतुस्तद्भ्रुव इति कारि
कायास्त्रयस्समुदिता हेतुरिति काव्यप्रकाशव्याख्यायामसंगतिर्दुर्वारैव एवमसमानलिङ्गकस्थले विशेष्य
वाचकपदासमानवचनस्यापि विशेषणपदस्य साधुत्वे तादृशस्थले औत्सर्गिकमेकवचनमेव सर्वत्र वि
शेषणपदानन्तरं प्रयोक्तुमुचितमिति प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि पितरो देवता इत्यादेर

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

नुपपत्तिःमेवम् यत्रविशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्यायाअविवक्षितत्वं तत्रविशे
ष्यविशेषणपदयोस्समानवचनत्वनियमः अतएवपुरूरवोमार्द्रवसौविश्वेदेवा इत्यादौ द्वित्वविशिष्टयोः पुरू-
रवोमार्द्रवःप्रभृत्योर्विशेषणतयाविवक्षितत्वान्नतद्वाचकपदस्यद्विवचनान्तता वेदाःप्रमाणमित्यत्रचविशेष
णपदोत्तरविभक्त्यावहुत्वविरुद्धमेकत्वंविवक्षितं तच्चप्रकृत्यर्थतावच्छेदकप्रमितिकरणत्वेन्वेति शाब्दप्रमा-
करणत्वंच शाब्दत्वावच्छिन्नयावच्छुद्धतनिष्ठमेकमेवेति नायोग्यता नचपदार्थःपदार्थेनान्वेति नतुपदार्थैक-
देशेनेतिव्युत्पत्तिविरोधः संपन्नोव्रीहिरित्यनेकव्रीहिव्यक्तितात्पर्यकेपिपदेएकवचनदर्शनेन तादृशव्युत्प-
त्तिसङ्कोचस्यावश्यकत्वात् यदिचात्रस्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसंबंधेनप्रकृत्यर्थएवैकत्वान्वयःव्रीहि-
त्वादिजातेःस्वरूपतएवव्रीह्यादिपदशक्यतावच्छेदकतयान्वयितावच्छेदकरूपेणानुपस्थितेः तत्रपदार्था-
न्तरस्यान्वयानुपपत्तेरितिमन्यसे तदाप्रकृतेपीदृशपेवगतिः यत्तुसम्पन्नोव्रीहिरित्यादौएकवचनोपस्थि-
तानिनानैकत्वानिप्रत्येकंनानाव्रीह्यादिष्वन्वीयन्तइत्युक्त्यैवसामञ्जस्येजातावेकत्वभानोपगमोनिर
र्थकइतितदसत् यतःस्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपस्वसजातीयद्वितीयरहितत्व
मेवैकवचनार्थः नत्वेकत्वमात्रं तस्यवस्तुमात्रसाधारण्येनार्थतएवलाभात् अनुपयोगाच्च अतएवप
शुनारुद्रंयजेतेत्यादौपशुनिष्ठतादृशैकत्वस्याविवक्षितत्वात् अनेकपशुकरणकयागान्नादृष्टसिद्धिःसा
जात्यंच स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकरूपेणौतोघटोस्तीत्यादौघटनिष्ठभेदप्रति-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

स्तु-
२

योगितानवच्छेदकैकत्वाप्रसिद्ध्यावपिनक्षतिः एतद्देशविद्यमानघटनिष्ठभेदप्रतियोगितावच्छेदकैकत्वस्यैव
तत्रबोधात् तस्य च प्रसिद्धत्वात् एतद्देशे बहुघटसत्त्वदशायां तादृशवाक्यप्रयोगस्तु जात्यैकत्वादेव समर्थनी
यः पर्याप्तितत्त्वशक्तित्वेन यागादेरूपस्थापकाभावात् सर्वेषां यागकरणपशुनिष्ठैकत्वानां समभिव्या
हृतयज्यर्थयागान्तरकरणत्वसंसर्गवत्पश्वन्तरनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वात् सर्वेषां या
गकरणपशूनां प्रत्येकं सजातीयद्वितीयराहित्यं न संभवति तथापि तादात्म्यएकत्वस्वाश्रयपशुकरणक
यागकरणपशुनिष्ठभेदप्रतियोगितावच्छेदकत्वोभयसंबंधेन एकत्वविशिष्टान्यैकत्वमेव प्रकृते एकवच
नार्थः यत्तु एकत्वाविवक्षायामविभावाख्यातस्थले एकवचनस्य साधुत्वदर्शनेन संख्यायाश्चाविवक्षणेऽपि
संपन्नो व्रीहिरित्यादावेकवचनोपपत्तेः रलं जात्यैकत्वपरतया तत्समर्थनेनेति तदप्यकिञ्चित्करम् आख्या
ख्यातस्थले गत्यन्तरविरहेण विभक्तेर्निरर्थकत्वोपगमात् अत्र सार्थकत्वसंभवे तत्परित्यागस्यानुचित
त्वात् सति तात्पर्ये तद्बोधस्यानुभविकत्वाच्च एवं त्रयः समुदिता हेतुरित्यत्र हेतुपदं कार्योत्पादप्रयोजक
तावच्छेदकसमुदायत्वावच्छिन्नपरं तादृशसमुदायत्वान्वितमेकवचनार्थः अत एव शक्त्यादीनां त्रयाणां
तृणारणिमणिन्यायेन हेतुत्वशंकानिरासः तथा सत्येषामेकैकसमवधानदशायामपि कार्योत्पत्ते
रावश्यकतया तत्त्रितयपर्याप्तसमुदायत्वस्य कार्योत्पत्तिप्रयोजकतानवच्छेदकतया तेषां त्रयाणां तथा
विधैकसमुदायत्वानुपपत्तिः एवं जात्याकृतिव्यक्तयः पदार्थ इत्यत्र त्रितयनिष्ठस्य पदशक्तिनिरूपपदार्थत्वं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

स्यैकत्वं विवक्षितमिति तत्र विशेष्यपदस्य बहुवचनान्तत्वेपि विशेषणपदस्यैकवचनान्तत्वोपपत्तिः प्रत्यक्षानु
मानेत्यादिसूत्रे प्रमाकरणत्वरूपप्रकृत्यर्थतावच्छेदकस्य प्रत्यक्षानुमानादिनिष्ठस्यैकतायाः बाधितत्वेना
विवक्षितत्वात् प्रमाणपदस्य बहुवचनान्ततेति एवमपि पितरो देवता इत्यत्रापि पितृपितामहादीनां सहिता
नामेकरूपेण देवतात्वविरहेण पितृत्वपितामहत्वादिना पृथगेव त्यागोद्देश्यत्वरूपदेवतात्वात् उद्देश्यता
वच्छेदकभेदेनैवोद्देश्यताभेदात् तत्रैकत्वस्याविवक्षया देवतापदस्य बहुवचनान्ततेति दिक् स्वप्रकृतिकत्वं च
स्वाव्यवहितोत्तरत्वेनानुसंधीयमानत्वं तेन दधि सुन्दरमित्यादौ विशेष्यपदानन्तरं विभक्तेरसत्त्वेपि न
क्षतिः तत्र विभक्तेरनुसंधानं विना शाब्दबोधानुदयात् एवं तादृशविभक्तिसजातीयविभक्तिकत्वमपि
तथाविधविभक्त्यव्यवहितपूर्ववर्तितया प्रतिसंधीयमानत्वम् तेनेदं दधीत्यादौ विशेषणपदानन्तरं वि
भक्तेरसत्त्वेपि न क्षतिः अथ नीलघटघट इत्यादावपि पदार्थोपस्थित्यादिरूपकारणसंभवति कथं नी
लघटाद्योरभेदान्वयबोधः सामग्र्याः कार्यजनने तथाविधनियमभङ्गप्रसंगरूपप्रयोजनलेर किं
चित्करत्वादिति चेन्न तत्र तथाविधान्वयबोधोपयिकाकांक्षाविरहात् तथाहि तादृशान्वयबोधोप
यमाविभक्त्यन्तघटादिपदसमभिव्याहृतप्रथमान्तनीलादिपदत्वमेवासमस्तनीलादिपदाद्याकां
क्षा समासस्थले च घटपदाव्यवहितपूर्ववर्तिनीलादिपदत्वं नीलादिपदाव्यवहितोत्तरवर्तिघटादि
पदत्वं वाकांक्षा उक्तस्थले च तादृशव्याप्यकस्यान्यथाकांक्षायाविरहान्नापत्तिः कार्यतावच्छेदकको

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

व्यु·वा·
३

दैस्याव्यवहितोत्तरत्वनिवेशान्नोक्ताकांक्षाज्ञानयोः परस्परबोधेऽव्यभिचारः यत्तु समासव्यासस्साधारणं वि
शेषणपदस्य विशेष्यवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वरूपं विरुद्धविभक्तिराहित्यमेव तादृशान्वय
बोधौपयिकाकांक्षा विशेष्यवाचकपदनिष्ठं विशेषणपदाप्रकृतिकविभक्त्यप्रकृतित्वं च न तथा नील
घटमानयेत्यादावसंभवादिति तदसत् विशेष्यवाचकपदाप्रकृतिकत्वस्य तादृशपदानुत्तरत्वस्य तदुत्त
रत्वेनाप्रतिसंधीयमानत्वरूपस्य वा नीलो घट इत्यादौ नीलादिपदसमभिव्याहृतविभक्तौ घटपदसम
भिव्याहृतविभक्तिभिन्नायामसत्वात् अथ विशेष्यवाचकपदोत्तरावृत्तिविभक्ति विभाजकधर्मवद्विभ
क्तिराहित्यस्य विवक्षणान्न दोष इति चेत्तर्हि विभक्तित्वादिकमजानतः पुरुषस्य तादृशाज्ञानासंभवात्
शाब्दबोधानुपपत्तिः नीलो घट इत्यादावपि सुपदस्याम्पदत्वभ्रमदशायां तादृशशाब्दबोधानुदयात्
नीलस्य घट इत्यादावपि षष्ठ्यादेः सुपदत्वादिभ्रमदशायां शाब्दबोधोत्पत्त्या स्वरूपतो विरुद्धविभक्ति
राहित्यस्या [redacted] प्रयोजकत्वात् अथ नीलो घटः नीलघट इत्यादि द्विविधबोधसाधारणं स्वोत्त
रत्वादिभिन्नपदानुत्तरत्वविशिष्टस्वोत्तरत्वादिरूपस्वाव्यवहितोत्तरत्वसंबंधेन नीलादिपदवत्त्वा
द्येतघटादिपदत्वमेव तथास्त्विति चेन्न नीलघटरूपमित्यादिवाक्यसाधारण्यानुरोधेनान्यवि
धाया अस्याकांक्षायाः समासस्थलेऽप्युपगंतव्यतया उपदर्शितव्यासस्समाससाधारणानुग
ताकांक्षानुसरणस्याप्रयोजकत्वात् अथ नीलं घटमानयेत्यादौ नीलादेर्घटादावन्वयोपग ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

मे नीलादिपदोत्तरविभक्त्यर्थकर्मत्वादेः कुत्रान्वय इति चेन्न कुत्रापि विभक्तिः पदसाधुत्वार्थमेव प्रयु
ज्यते अभेद एव विशेषणविभक्तेरर्थः अभेदस्य संसर्गतया भानं तु समासस्थल एव तत्र लुप्तविभक्त्य
नुसंधानं विनापि शाब्दबोधस्यानुभविकत्वाच्चेति वदन्ति अथैतन्मतेऽभेदो यदि भेदत्वावच्छिन्नाभावः
तदाऽप्रसिद्धिः यदि च भेदप्रतियोगिकोऽभावस्तदा नीलं जलमित्यादिवाक्यस्यापि प्रामाण्यापत्तिः जा।
ले द्वित्वादिना नीलभेदाभावस्य सत्वात् नीलभेदत्वावच्छिन्नाभावस्य विभक्त्यर्थत्वे नीलादिपदार्थान
न्वयप्रसंगः न च भेदप्रतियोगिकाभाव एव विभक्त्यर्थः नीलपदसमभिव्याहारान्नीलभेदत्वावच्छिन्ना।
भावः प्रतीयत इति वाच्यं पदार्थद्वयसंसर्गभानस्यैवाकांक्षानियम्यत्वात् नीलभेदत्वावच्छिन्नप्रतियो
ताकत्वभावेन वृत्तिं विना भेदत्वरूपपदार्थतावच्छेदकस्याभावे तादृशसंबंधेन भानासंभवात् मैवम् भेदो।
भावत्वविशेषणविभक्तेरर्थः विशिष्टलाभस्त्वाकांक्षादिवशात् एतेन भेदे नीलादिपदार्थान्वये एक
देशान्वयप्रसंग इत्यपि निरस्तं न च विशेषणविभक्तेरभेदार्थकत्वे नीले घट इत्यादावप्यभेदान्वयबोधा
पत्तिः धान्येन धनवानित्यादौ तृतीयया अभेदबोधनात् अभेदप्रकारकबोधे विरुद्धविभक्तिराहित्या
नपेक्षणादिति वाच्यं द्वितीयादिनाऽभेदबोधने द्वितीयाद्यन्तविशेष्यवाचकपदसमभिव्याहारस्य
प्रयोजकत्वमित्यभ्युपगमात् अथ प्रमेयो घट इत्यादौ प्रमेयत्वावच्छिन्नभेदाप्रसिद्ध्या लघुसमनियता।
गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेन कंबुग्रीवादिमान्घट इत्यादावपि कम्बुग्रीवादिमत्त्वाव।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

सु॰वा॰ छिन्नप्रतियोगिताकभेदाप्रसिद्ध्याविशेषणाविभक्तेरभेदार्थकत्वासंभवः एवंनीलपटादिपरनीलादि-
४ पदघटितस्यनीलोघटइत्यादिवाक्यस्यापिप्रामाण्यापत्तिः नीलत्वादिनापटादेर्भेदाभावस्यनीलघटा-
दौसत्वात् एतेनविशेषणतावच्छेदकीभूतनीलत्वप्रमेयत्वादिकमेवविशेषणाविभक्त्यर्थः नीलत्वादे-
र्नीलत्वावच्छिन्नभेदाभावरूपतयाऽभेदार्थकत्वोपपत्तिरित्यपिनिरस्तम् नीलत्वादौनीलत्वादिमतः
स्ववृत्तित्वसंबंधेनान्वयेआकांक्षाविरहाच्च यथातद्विशिष्टेऽधिकरणेतथातदन्वयोनुभवविरुद्धस्त-
थातद्धर्मेआधेयतयातद्धर्मवदन्वयोपि अतएवकर्मणिवृत्तीत्यादिवाक्यस्यनिराकांक्षता नचैवंसंसर्ग-
तामतेव्यतिरेकः नीलोघटइत्यादौस्ववृत्तिनीलत्वादेः संसर्गताभ्युपगमेउक्तस्थलेप्रामाण्यापत्तेर्दुर्वार-
त्वादितिवाच्यम् स्ववृत्तिनीलत्वादेः स्वस्मिन्नेवपटादौसंबंधत्वोपगमेनपटादिवृत्तिनीलत्वादेर्घटादिसं-
बंधताविरहेणतादृशातिप्रसंगाभावात् वस्तुतस्तुतत्तद्व्यक्तित्वावच्छिन्नभेदाभावएवनीलत्वादिप्रकारेण
भासमानानांतत्तद्व्यक्तीनांस्वस्मिन्नन्वयतयाभासतइतिनकाप्यनुपपत्तिः संबंधताच्चतस्यभेदप्रतियो-
गिकाभावत्वेनतत्तद्व्यक्तिभेदप्रतियोगिकाभावत्वेनाविस्पन्यदेतत् नचैवंविशेषणाविभक्तेरभेदार्थकत्व-
मतेपितत्तद्व्यक्तित्वावच्छिन्नाभेदाख्यविभक्त्यर्थोवाच्यइतिवाच्यम् तथासत्यपूर्वव्यक्तिनिष्ठतत्तद्व्यक्तित्वस्य
कथंचिदपिभानासंभवेनतदवच्छिन्नभेदाभावेशक्तिग्रहासंभवेनापूर्वव्यक्तीनामभेदान्वयबोधानुपप-
त्तिः संसर्गज्ञानस्यविशिष्टबुद्धावहेतुत्वेनानुपस्थितस्यापिसंसर्गतयाभानसंभवेनसंसर्गतामतेना-
प नुपपत्तिः नचविभक्त्यर्थेपिभेदेतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनाभावेनीलत्वादिनाऽनु ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

र्वव्यक्तीनामन्वयः ताहृशभेदानामपि तत्तद्व्यक्तिभेदत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावेऽन्वयमुपगम्यते ता
वतैव तत्तद्व्यक्तित्वावच्छिन्नाभेदलाभसंभवे न काचिदनुपपत्तिरिति वाच्यं विशेषणतावच्छेदकावच्छिन्नायाएव
प्रतियोगितायाअभावे प्रतियोगिनः संबन्धतयाभानादन्यथा विशिष्टवैशिष्ट्यबुद्धित्वानुपपत्तेः प्रतियो
गिविशिष्टाभावज्ञानं च विशिष्टवैशिष्ट्यबोधमर्यादां नातिक्रामतीति दर्शनात् केवलं विशेष्ये विशेषणमिति
रीत्या न कश्चिदप्युपैतीति सत्यम् अभेदस्तादात्म्यं तच्च स्ववृत्त्यसाधारणो धर्मः असाधारण्यं चैकमात्रवृत्ति
त्वं न च स्वसामानाधिकरण्यस्वप्रतियोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टयत्तदन्यत्वमित्येकमात्रवृत्तिधर्म
एव विशेषणविभक्तेरर्थः वृत्तिश्चात्र प्रकृत्यर्थस्य संसर्गमर्यादया भासते ताहृशश्च धर्मस्तत्तद्व्यक्तित्वादिरूप एवा
सर्वव्यक्तिनिष्ठस्य ताहृशधर्मस्य विशिष्य ज्ञातुमशक्यत्वेप्येकमात्रवृत्तिधर्मत्वादिना सामान्यप्रत्यासत्तितः सुग
हत्वमेवाभेदस्य संसर्गतामतेप्येताहृशाननुगताभेदस्यैव तथात्वमुचितम् तत्तद्व्यक्तित्वावच्छिन्नभेदाभावकूटस्य
विशिष्य तथात्वे घटो न नील इत्यादिवाक्यजन्यबोधे प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमाविति न्यायेन
ताहृशाननुगतसंबंधावच्छिन्नप्रतियोगिताकाननुगताभावा एव भासेरन् ननु नीलादिवृत्तिप्रतियोगिता
क एको भावस्तस्यासत्ति यत्किंचित्ताहृशाभावतात्पर्येण प्रयुक्तस्य नीलेपि न नील इत्यादिवाक्यस्य प्रामाण्य
स्यादिति इदं तु बोध्यं विशेषणविभक्तेरभेदार्थकत्वे घटो न नील इत्यादौ नञा नीलाद्यभेदाभाव एव प्रत्यायि
ष्यते ननु नीलादिभेदः स्याहृशसमभिव्याहारस्थले येन संबंधेन यद्धर्मविशिष्ट येन रूपेण यद्वत्त्वं नञोऽसत्त्वे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

प्रतीयते तादृशस्थले नञः तद्धर्मिगतताद्दृशधर्मसंबंधावच्छिन्नप्रतियोगिताकत्वबोधस्य व्युत्पत्तिसिद्धत्वात्

वृ: वा: प्रतियोग्यभावान्वयावित्यादेरप्ययमेवार्थः एवं च नञो भेदबोधकत्वं न कुत्रापि संभवतीति अनीलं घटमान

प येत्यादौ घटपदसामानाधिकरण्यानुरोधेनानीलपदस्य नीलभिन्नपरतया नञो भेदवत्त्वे वा लक्षणाया उप

गन्तव्यत्वात् इदं त्ववधेयम् अभेदस्य प्रकारताम् ते पि न नीलः इत्यादिवाक्यस्य नीलाभेदाभावाभावबोधक

त्वे पि तृतीयाभावस्य प्रतियोगिरूपतया नञो भेदबोधकत्वेनानुपपन्नं परं तु भेदत्वप्रकारेण भेदबोधो भ

वति न वेति अन्यदेतत् इदं तु तत्त्वम् असमासे नीलो घटः इत्यादिस्थले ऽभेदस्य संसर्गत्वोपगमे पि गौरवविर

हात् तत्र विशेषणविभक्तेः वृत्तिकल्पनमनुचितम् न च यत्राभेदे विशेषणविभक्तेः शक्तिभ्रमः स्वारसिक

लक्षणाग्रहो वा तत्र सर्वमतएवाभेदप्रकारकबोधस्य नीलो घटः इत्यादिवाक्यादुत्पत्त्या तादृशसमभिव्या

हारज्ञानस्य द्विविधबोधे हेतुताद्वयं कल्पनीयम् भेदस्य संसर्गतावादिनेति गौरवम् एवं तादृशसमभि

व्याहारज्ञानघटितसामग्र्या भिन्नाभिन्नयोगपता ज्ञानघटितत्वेन द्वैविध्यमिति भिन्नविषयकप्रत्यक्षा

दिके प्रति तादृशप्रमाणाद्दृसामग्र्याः प्रतिबंधकतायामप्याधिक्यमिति वाच्यं अभेदस्य संसर्गतावादिनोक्तस्य

ले पि न तत्संसर्गकस्य बोधस्यैवोपगमादिति दिक् स्तोकं पचति मृदु पचतीत्यादौ विरुद्धविभक्त्यविरुद्धपदो

त पस्थापितस्तोकमृद्वादेर्धात्वर्थपाकादावभेदान्वयोपि व्युत्पत्तिसिद्धः तदनुरोधेन च द्वितीयान्तपदधा

तुपदयोस्समभिव्याहारस्याप्यभेदान्वयबोधोपयिकाकांक्षात्वमुपगम्यते क्रियाविशेषणस्थले न ना प

द्वितीयातिरिक्तविभक्तिकत्यद्याने क्रियाविशेषणानां कर्मत्वमित्यनुशासनेन तत्र कर्मत्वातिदेशात् नचैवं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

स्तोकः पाक इत्यादावपि द्वितीयाप्रसंगः तत्रापि स्तोकादेः क्रियायामेव विशेषणत्वात् भावकृत्तो प्रयोगसाधुत्व।
मात्रार्थकत्वात् धात्वर्थेनैव तत्र पाकादिः प्रतिपादनादिति वाच्यम् क्रियापदस्य तत्र सार्थकप्रत्ययान्तधात्वर्थस्या
पि तादर्थ्यपरत्वात् स्तोकं स्थीयत इत्यादौ चाख्यातस्य वर्तमानत्वाद्यर्थकतया सार्थकत्वात् न च वर्तमानत्वा।
द्यविवक्षायां द्वितीयानुपपत्तिरिति वाच्यम् वर्तमानत्वादिविवक्षास्थल इवार्थबोधप्रयोजकाकांक्षाशालि
त्वेनैव तदविवक्षास्थलेपि भावाख्यातस्यार्थवत्वात् केचित्तु धातोरिव घञन्तस्यापि पाकादौ शक्तिस्तथैव
ते स्वान्ययाहृद्विभक्त्यर्थसंख्याकर्मत्वादीनां तत्र पाकादावन्वयानुपपत्तेः प्रकृत्यर्थान्वितस्वार्थबोधकत्वे।
प्रत्ययानामिति व्युत्पत्तेः धातूनां च सुब्विभक्त्यप्रकृतित्वात् प्रकृत्येकदेशार्थेपि प्रत्ययार्थस्यान्वयोपगमे पचमा
नेपश्यतीत्यादितः पचन्तं पश्यतीत्यादितश्च पाकादौ द्वितीयाद्यर्थकर्मत्वाद्यन्वयप्रसंगः एकत्र विशेषणत्वे
नोपस्थितस्यान्यत्र विशेषणत्वेनान्वयस्याव्युत्पन्नतया तत्र प्रत्ययार्थविशेषणपाकादेर्न कर्मत्वादिविशे
षणतयान्वय इति चेन्न घञादिपाकादिविशेषणतया सुवर्थसंख्यान्वयसंभवात् यत्र पाकादेः कर्त्रादेर्द्वित्वादि।
कं वाधितं पाकादेश्च तदवाधितं तत्र पचन्तौ पश्यति पचमानौ पश्यतीत्यादिप्रयोगप्रसंगस्य दुर्वारत्वाच्च धा
त्वर्थस्याख्यार्थसुबर्थान्वयबोधं प्रति तत्तद्धातूत्तरप्रत्ययधर्मिककिंचिदर्थपरत्वज्ञानस्य प्रतिबंधकत्वमुप।
गम्यैतादृशातिप्रसंगवारणे च गौरवात् एवं प्रोमतं पचनमित्यादौ धातुमात्रेण पाकाद्युपस्थितौ च
तत्र प्रोमतनाद्यभेदान्वयबोधानुपपत्तेः विशेषणविभक्तिसजातीयविभक्तिप्रकृत्यनुपस्थाप्यत्वात्।
प्रकृत्येकदेशसाधारणतादृशविभक्तिप्रकृतित्वस्य प्रयोजकत्वे तत्र ल्युडादेरधिकरणादिपरत्वेपि।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

वै·भा·
६
पाकादौ पाको मन्नाद्यभेदान्वयबोधापत्तेः कस्यचित्प्रतिबंधकत्वो कल्पयित्वात् तद्वारणे गौरवात् न चैवं
मृगकुम्भमद्रूपिप्पल्यादि पूर्वपदार्थप्रधानसमस्तपदात् कुंभसमीपपिप्पल्याद्यादौ विभक्त्यर्थान्वयबो
धस्य प्रातिपदिकोत्तरार्थाभेदान्वयस्य चानुपपत्तिः पूर्वपदस्य समासोत्तरविभक्तिप्रकृतित्वादिति वा
च्यं एतदनुरोधेनैव तत्र कुंभपिप्पल्यादिपदानामेव कुंभसमीपपिप्पल्याद्यादौ लक्षणायाः पूर्वपद
स्य तात्पर्यग्राहकमात्रोपयोगितायाश्च स्वीकारात् वस्तुतस्तु तत्र तत्रोत्तरपदार्थविशेषिते पूर्वपदार्थे समी
पाद्यादौ प्रत्ययार्थान्वयबोधे तादृशसमस्तपदप्रत्ययपदयोरव्यवहितपूर्वापरीभावो आकांक्षा एवं तत्र
प्रातिपदिकोत्तरार्थान्वयबोधे समानविभक्तिकयोस्तादृशसमस्तपदपदांतरयोश्च समभिव्याहारो
आकांक्षा तथा सत्यतिप्रसंगाभावात् धात्वर्थे [illegible] पाकादौ प्रत्ययार्थान्वयबोधे प्रातिपदिका
न्तरार्थाभेदान्वयबोधे च ल्युड्घञाद्यन्तसमुदायप्रत्ययपदयोरानुपूर्वीरूपाव्यवहितपूर्वापरीभावस्य स
मानविभक्तिकयोस्तादृशसमुदायपदपदांतरयोस्समभिव्याहारस्य चाकांक्षात्वापरामे तु दर्शितादधि
करणार्थकल्युट्प्रत्ययस्य लोपापत्तिप्रसंगस्य दुर्वारतया न तत्सम्भवः अथ घञाद्यन्तसमुदायस्य सा
र्थकत्वे घञाद्यन्तसमुदायस्य संयोगत्वविभागत्वादिविशिष्टवाचकत्वं व्युत्पाद्य संयोगविभागादिप
दानां नैमित्तिकसंज्ञात्वनिराकरणमन्यो दीधितिकृतां विरुद्ध्येतेति चेत्का क्षतिः न हि कस्यचित्तत्रप
हेतो विपरीतलिखने युक्तिबलाद्वस्तुसिद्धौ बाधकम् एवं च यत्र धातुमात्रस्यैव पाकादौ तात्पर्यं तत्र तद्विशे
षणवाचकपदाद्वितीयैव यत्र तु कृदन्तसमुदायस्य पाकादौ तात्पर्यं तत्र तादृशापदं तथाविधकृदन्तसम ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

दायसमानविभक्तिकमेव तदुक्तम् कातन्त्रपरिशिष्टकृता कथं स्तोकः पाकः कृदन्तविशेषणत्वात् ज्ञात्वैकाधिकरण्येन तु
स्तोकमोदनस्य पाक इति स्यादेवेति वदंति तदर्थबोधकपदोत्तरविभक्त्या संख्याबोधनेऽभेदसंसर्गावच्छिन्नप्रकारताभिन्ना-
तदर्थविषयताशालिशाब्दबोधसामग्र्यपेक्षिता तादृशशाब्दबोधस्तदर्थमुख्यविशेष्यकः तदर्थनिरूपिताभेदभिन्नसंस-
र्गविषयकश्च नीलो घटः नीलो घटोस्तीत्यादौ च विशेष्यवाचकपदोत्तरविभक्त्यैव द्वित्वादिकं प्रत्याय्यते एवं च क्रियाविशे-
षणवाचकपदोत्तरविभक्त्याऽबाधितयोरपि द्वित्वबहुत्वयोः प्रत्यायनासम्भवात् तादृशपदोत्तरमौत्सर्गिकमेकवचनमेव
भावात्स्यात्तस्यलवद्द्वित्ववद्धेयम् अभेदान्वयबोधस्तु विरूपोपस्थितयोरेवेति व्युत्पत्तिः घटो घटः दण्डवान् दण्डवान्
पाकं पचतीत्यादौ घटत्वदण्डवत्त्वपाकत्वाद्यवच्छिन्ने तत्तद्रूपावच्छिन्नस्य तत्पान्वयबोधानुदयात् अप्रयोजकी-
भूतसमानविभक्तिकत्वादेः सत्त्वात् कथं न तादृशान्वयबोधः अत्राहुः यादृशफलं क्वचित्प्रसिद्धं तादृशस्यैवापत्तिः सं-
भवति क्लृप्तसामग्रीबलात् यादृशं च सर्वत्रैवाप्रसिद्धम् तादृशस्यापादकाप्रसिद्धेरापत्तिरशक्यैवेति घटत्वाद्यवच्छि-
न्नविशेष्यताकाभेदसंसर्गकघटत्वाद्यवच्छिन्नप्रकारकशाब्दबोधस्य क्वचिदप्यनुदयात् कथं तदापत्तिः अपि घटो-
नीलघटः दण्डवान् दण्डवानित्यादौ तादृशशाब्दबोधस्य प्रसिद्धिः विधेयकोटावधिकावगाहिनः शाब्दबोधस्य न दी-
नैरूप्यमापादितं चेत्तर्हि घटाद्यंशे विशेषणतावच्छेदकविधया नीलादिभाननियामकनीलाद्युपस्थितितात्पर्यज्ञान-
विरहकाले घटादितैव सामग्री घटत्वाद्यवच्छिन्नविशेष्यकनीलघटत्वावच्छिन्नाभेदान्वयबोधप्रयोजिका तदभावादेव
घटो घट इत्यादौ न तादृशान्वयबोधापत्तिरिति चेन्न अपि द्रव्यत्वादौ धर्मितावच्छेदकतासंबंधेन प्रसिद्धस्य घट-
त्वाद्यवच्छिन्नप्रकारकाभेदान्वयबोधस्य घटत्वादावापत्तिः संभवति न च तत्रापादकाभावः तत्र तात्पर्यज्ञानवि-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

सु·वा·
७

शेषादिघटिताया धर्मितावच्छेदकतया द्रव्यत्वादौ तद्व्यादनियामकसामग्र्या एवापादकत्वात् नच धर्मितावच्छेदक
तासंबंधेन द्रव्यत्वादौ तादृशान्वयबोधोत्पत्तिप्रयोजका द्रव्यपदजन्यद्रव्यत्वाद्यवच्छिन्नोपस्थितितदवच्छिन्न
विशेष्यकयोग्यताज्ञानादिघटितसामग्र्येव धर्मितावच्छेदकतायाः तत्कार्यतावच्छेदकसंबन्धताविरहेपि
द्रव्यत्वादिनिष्ठायास्तस्यास्तत्कार्यतावच्छेदकधर्मघटकत्वात् तादृशसामग्र्याश्चात्मनिष्ठप्रत्यासत्या द्रव्यत्वा
वच्छिन्नविशेष्यकघटत्वाद्यवच्छिन्नाभेदबुद्धित्वरूपस्वीयकार्यतावच्छेदकावच्छिन्नोत्पत्तेरेव व्याप्यतया घ
टत्वादौ धर्मितावच्छेदकतासंबंधेन घटत्वावच्छिन्नाभेदबोधापादकत्वेन संभवतीति वाच्यं योग्यताज्ञा
नस्य धर्मितावच्छेदकं निवेश्य तद्भेदेनानन्तकारणताकल्पनमपेक्ष्य लाघवाद्धर्मितावच्छेदकतासंबंधेन ज्ञा
नबुद्धौ तादृशसंबंधेन तस्य धर्मितावच्छेदकमनिवेश्य हेतुताकल्पनस्यैवोचितत्वात् घटत्वादिधर्मिता
वच्छेदककघटत्वाद्यवच्छिन्नप्रकारकयोग्यताज्ञानवलादेव घटत्वादौ धर्मितावच्छेदकतासंबंधेन तदा
पत्तेः नच योग्यताज्ञानस्य धर्मितावच्छेदकनिष्ठप्रत्यासत्या हेतुत्वोपगमे द्रव्यत्वाद्यवच्छिन्नस्य पदानु
पस्थितत्वेपि द्रव्यत्वादौ तादृशप्रत्यासत्यासन्नयोग्यताज्ञानवलात्तत्र तादृशप्रत्यासत्या शाब्दबोधाप
त्तिः आत्मनिष्ठप्रत्यासत्या हेतुभूतो द्रव्यत्वावच्छिन्नोपस्थितिमन्तरेणापि तादृशप्रमेयत्वाद्यवच्छिन्नोप
स्थित्यादिदशायां प्रमेयत्वादौ धर्मितावच्छेदकतासंबंधेन योग्यताज्ञानस्य फलजनकत्वात् तादृशद्र
व्यत्वावच्छिन्नोपस्थितिविरहस्याकिंचित्करत्वादिति वाच्यं समानप्रकारताप्रत्यासत्या पदार्थोपस्थि ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

तेः शाब्दबोधहेतुत्वोपगमात् येन संबंधेन यद्धर्मावच्छिन्नं कार्यं प्रति येन संबंधेन यद्धर्मावच्छिन्नकार्यं।
स्य व्यापकता तेन संबंधेन तद्धर्मावच्छिन्नकार्योत्पादकसामग्र्यापि तेन संबंधेन तद्धर्मावच्छिन्नकार्यो।
त्पत्तावपेक्षितत्वेन प्रकारतासंबंधेन द्रव्यत्वादौ द्रव्यपदजन्यपदार्थोपस्थित्यसत्त्वेन तत्र धर्मितावच्छेद।
कतासंबंधेन शाब्दबोधापत्तेरयोगात् न च यत्र प्रमेयत्वावच्छिन्नविशेष्यकवृत्तिज्ञानजन्यप्रमेयत्वाद्या।
वच्छिन्नविषयकोपस्थितावेव बोधकांतरात् द्रव्यत्वावच्छिन्नस्य भाने तत्र द्रव्यत्वावच्छिन्नविषयकशाब्द
बोधापत्तिवारणाय तद्धर्मावच्छिन्नविशेष्यकशाब्दबोधं प्रति तद्धर्मावच्छिन्नविशेष्यकवृत्तिज्ञानजन्यतद्ध
र्मप्रकारकोपस्थितित्वेनैव पदार्थोपस्थितेर्हेतुता वाच्या तथा च प्रकारविशेषस्य निवेशावश्यकत्वे आत्म
निष्ठप्रत्यासत्त्यैव हेतुताकल्पनं युक्तम् अन्यथा पुरुषभेदेन कार्यकारणभावबाहुल्यं स्यादिति वाच्यं स्वज।
नकज्ञानीयवृत्तिप्रकारतानिरूपितविशेष्यतावच्छेदकताविशिष्टप्रकारतासम्बन्धेनोपस्थितेर्हेतुता
स्वीकृत्य तादृशापत्तेर्वारणात् न च पदार्थेपि प्रकारतासंबंधेन शाब्दबुद्ध्युत्पत्त्या तत्र प्रकारतासंबंधेन प।
दार्थोपस्थितेरभावात् प्रकारनिष्ठप्रत्यासत्त्या पदार्थोपस्थितेर्हेतुताव्यभिचारेणाकल्पयितुमशक्यतेति
वाच्यं परामर्शकारणताविचारप्रदर्शितदिशाव्यभिचारस्य वारणीयत्वादिति चेन्नहि तद्धर्मावच्छिन्नाभेदसंस।
र्गावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मभेदस्यापि।
हेतुतायास्वीकरणीयतया न घटो घट इत्यादिस्थले शाब्दबोधापत्तिः स घट इत्यादिवाक्याज्ज्ञातत्वादिना

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

व्यु॰वा॰ घटत्वादिधर्मितावच्छेदककस्य स्वरूपतो घटत्वादिप्रकारतावच्छेदककस्य घटस्स इत्यादिवाक्यात्स्वरूपतो घ
८ टत्वधर्मितावच्छेदककस्य जातित्वादिविशिष्टघटत्वावच्छिन्नप्रकारकस्य च शाब्दबोधस्योपपत्तये विशे
ष्यत्वप्रकारत्वयोरवच्छेदकत्वेन निरवच्छिन्नत्वेन विशेषणीये घटो नीलघट इत्यादावन्वयबोधस्य साधा
रणकत्वेऽन्यत्रोदर्शितदिशा सोऽप्युपपादनीयः एवं च सस इत्यादिवाक्याज्जातित्वावच्छिन्नधर्मिता
वच्छेदकताकतद्धर्मावच्छिन्नप्रकारतावच्छेदकताकाभेदान्वयबोधस्य वारणाय तद्धर्मावच्छिन्नावच्छे
दकताकप्रकारतानिरूपितधर्मितावच्छेदकतावच्छेदकत्वप्रत्यासत्त्या शाब्दबोधं प्रति तद्धर्मभेदस्या
पि पृथक्कारणत्वं कल्पनीयम् एवं दण्डवान्दण्डवानित्यादिवाक्याद्दण्डसंयोगत्वाद्यवच्छिन्नव
ति तदवच्छिन्नवदभेदान्वयबोधवारणाय दण्डसंयोगत्वावच्छिन्नावच्छेदकताकप्रकारतानिरू
पितविशेष्यतानिरूपितसंयोगत्वावच्छिन्नावच्छेदकताकनिरूपितावच्छेदकतावच्छेदकत्वसंबंधे
न शाब्दबुद्धौ दण्डत्वादिभेदस्य पृथक्कारणता कल्पनीया अवच्छेदकतायां निरवच्छिन्नत्वनिवे
शः एवं बहो ध्यः वस्तुतस्तु तद्धर्मान्यवृत्तिविषयतासंबंधेन ज्ञानं प्रति तद्धर्मभेदत्वेन हेतुता स्वी
करणीया लाघवात् एवं च घटत्वावच्छिन्नाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्य ८
तावच्छेदकतासंबंधेन ज्ञानं प्रति घटत्वान्यवृत्तिविषयतासंबंधेन ज्ञानत्वाद्यवच्छिन्नस्याप

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

वकतया घटत्वादौ तादृशविषयतासंबंधेन ज्ञानत्वावच्छिन्नोत्पादकसामग्रीविरहेण न तादृशविशेष्यता
वच्छेदकतासंबंधेन शाब्दबोधापत्तिः एवं च दण्डवान् दण्डवान् घटवान् घटवानित्यादिशाब्दबोधवारणाय तो
धेन धर्मितावच्छेदकतावच्छेदकादिनिष्ठप्रत्यासत्त्या कारणान्तरमपि न कल्प्यते एवमुद्देश्यतावच्छेदक
विधेययोरैक्ये नैको द्वावित्यादिवाक्यादेकत्वद्वित्वाद्यवच्छिन्ने एकत्वद्वित्वादीनां भेदानुदयात् एक
त्वत्वद्वित्वत्वाद्यवच्छिन्नसमवायादिसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितसमवा
यादिसंसर्गावच्छिन्नावच्छेदकतावच्छेदकत्वादिसम्बन्धेन शाब्दबुद्धित्वेकत्वत्वादिभेदस्य कर्मगच्छती
त्यादौ कर्मत्वाद्यवच्छिन्नाधेयत्वादिसंबंधेन तद्धेतोरन्वयबोधवारणाय कर्मतात्वाद्यवच्छिन्नावच्छेदक
ताकाधेयतासंसर्गावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकतावच्छेदकत्वादिसम्बन्धेन शाब्दबुद्धौ
कर्मत्वत्वादिभेदस्य घटो न घट इत्याद्यनुमितेः शाब्दस्य च वारणाय घटत्वावच्छिन्नभेदप्रकारतानिरूपि
तधर्मितावच्छेदकतावच्छेदकत्वादिसंबंधेनानुमितौ शाब्दस्य बोधे च घटत्वभेदस्य हेतुत्वान्तरमना
देयम् तद्धर्मभेदस्यैककारणतयैव सकलातिप्रसंगवारणसंभवादिति कृतं पल्लवितेन ॥छ॥ इत्यभेदा
संसर्गः ॥छ॥ भेदान्वयबोधश्च प्रातिपदिकार्थधात्वर्थयोः प्रत्ययार्थेन क्वचिन्निपातार्थेन च समसमेव
जायते न त्वन्येन सत्यपि पदार्थोपस्थितियोग्यताज्ञानादिरूपकारणकलापे राजा पुरुषो भूतलं घट
इत्यादौ पुरुषघटाद्यंशे राजभूतलादेः स्वत्वाधेयत्वादिसम्बन्धेन तण्डुलः पचति चैत्रः पच्यते इत्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

दौ कर्मत्व कर्तृत्वादिसम्बन्धेन तण्डुल चैत्रादौ पाकादेः पाकाद्यंशे वा तण्डुल चैत्रादेः स्वकर्मत्व स्वकर्तृत्वादिस
ब्यु.वा. म्बन्धेनान्वयाबोधात् निपातातिरिक्तप्रातिपदिकार्थयोः क्रियाताहृशप्रातिपदिकार्थयोश्च भेदेन साक्षा
९ दन्वयबोधस्याव्युत्पन्नत्वात् विभक्त्यर्थमन्तराकृत्य तयोरप्यन्वयबोधात् साक्षादिति निपातातिरिक्तत्वविशे
षणाद्भूतलेन घटः घटो न पट इत्यादौ घटादेर्नञर्थाभावेन मुखं चन्द्र इवेत्यादौ मुखचन्द्रादीनामिवार्थसादृ
श्यादिना न कलञ्जं भक्षयेदित्यादौ नैयायिकमतेन नञो पस्थाप्येन बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्व ए
रूपलिङर्थस्य विशेष्यतयान्वितेनाभावेन धात्वर्थभक्षणादेरन्वयप्रयोगतया गुरुमते विध्यर्थापूर्वांशे वि
विशेषणतयान्वितेन नञोपस्थाप्याभावेन धात्वर्थभक्षणादेरन्वे प्रतियोगितयान्वयेपि न क्षतिः राजपु
रुष इत्यादिसमासस्थले पुरुषादिपदार्थेन समं राजादिपदार्थस्य न भेदान्वयबोधः किन्तु तेन समं विभ
क्त्यर्थविशिष्टलाक्षणिकराजादिपदोपस्थाप्यराजसम्बन्धादेरभेदान्वयबोध एवेति न दोषः एवं मुखं
चन्द्र इत्यादिरूपकस्थले चन्द्रादिपदस्य चन्द्रादिसहृशे लक्षणया मुखादौ चन्द्रादिसादृश्याभेदान्वयबोध
एवेति न तु सादृश्यसम्बन्धेन चन्द्रादेर्मुखादावन्वय इति न व्यभिचारः केचित्तु रूपकस्थले चन्द्रादिपदस्य
चन्द्रादिसदृशे न लक्षणा किन्तु तत्र मुख्यार्थचन्द्रादेरेवाभेदभ्रमो मुखादौ मुखं न चन्द्र इत्यादि विशेषदर्श
नदशायां च न तत्र ताहशाभेदप्रत्ययः अपितु शाब्दजन्यविपाकलितपदार्थोपस्थितिमूलकोमानस एवा
हार्याभेदभ्रम इत्याहुः यत्तु तादात्म्यातिरिक्तसम्बन्धेन ननामार्थयोरन्वयबोधः तादात्म्यं च प्रकृते वृत्ति
धर्मिवत्त्वम् एवं च नीलो घट इत्यादौ स्ववृत्तिनीलत्वादिसम्बन्धेन घटाद्यंशे नीलपदार्थस्यैव मुखं चन्द्र ९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

इत्यादौ स्ववृत्याल्हादकत्वसम्बन्धेन मरवादौ चन्द्रादेरन्वयवोधः तादृशान्वयवोधेपि समानविभक्तिकत्वादिकं तन्त्रमतो
नातिप्रसङ्ग इति वदन्ति अथ राजा पुरुष इत्यादौ पदार्थोपस्थित्यादिसत्वे न कथं भेदेन शाब्दवोधः सामग्र्याः कार्यजननेउ
क्तनियमभङ्गरूपापत्तेः प्रयोजनवत्त्वेनाकिञ्चित्करत्वात् सामग्रीसत्त्वे अवश्यं कार्यमिति नियमात् न च तत्र भेदान्वयवोधो
पयिकाकांक्षाविरहाच्छाब्दसामग्र्या एवासिद्धेरिति वाच्यम् समभिव्याहाररूपाया आकांक्षायास्तत्रापि सत्वात् न च ता
दृशाकांक्षायास्तत्र सत्वेपि राजादिप्रकारकभेदान्वयवोधे राजादिपदाव्यवहितोत्तरपदत्वानुपूर्वीविशेषाया आ
कांक्षाया अपि प्रयोजकत्वात्तदभावादेव न तत्र शाब्दसामग्रीति वाच्यम् सम्बन्धादिविशेष्यकराजादिप्रकारकान्वयवो
धे एव तादृशाकांक्षाज्ञानस्य हेतुतया पुरुषादौ राजादिपदार्थप्रकारकान्वयवोधोत्पत्तौ तादृशाकांक्षाज्ञानरूपका
रणविरहस्याकिंचित्करत्वात् अत्र केचित् नामार्थप्रकारकभेदान्वयवोधं प्रति समानविशेष्यताप्रत्यासत्त्या प्रत्ययज
न्योपस्थितेर्हेतुत्वकल्पनात् नामार्थप्रकारकभेदान्वयवोधे विशेष्यतया प्रत्ययार्थस्यैव भानेन नामार्थस्य तत्र वि
शेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितेरसत्वात् न च संबंधादेरपि नामार्थतया तत्प्रकारकान्वयवोधे पुरुषादिप
दार्थस्य विशेष्यतया भानानुपपत्तिस्तत्तन्नामपदजन्यतत्तन्नामार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति प्रत्ययजन्यो
पस्थितित्वेन हेतुत्वे राजसम्बन्धः प्रमेयः राज्ञः पुरुष इत्येतादृशवाक्यद्वयजन्यवाक्यार्थद्वयान्वयवोधे पुरुषस्य
राजसम्बन्धविशेष्यतया भानानुपपत्तिरिति वाच्यं प्रत्ययाधीनतत्तत्पदार्थोपस्थितिजन्यतत्तदर्थप्रकारकशाब्द
वोधत्वावच्छिन्नं प्रत्येव प्रत्ययजन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्या हेतुत्वोपगमात् अथैवं यत्र राजा पुरु
ष इत्यादौत्र पुरुषपदाधीनपुरुषोपस्थितौ प्रत्ययवशात् कश्चित्प्रत्ययार्थोपि विषयीभूतस्तत्र प्रत्ययजन्यतया
विधसमभिव्याहारस्थले पुरुषोपस्थितेर्विशेष्यतासम्बंधेन पुरुषेपि सत्वात्तस्य राजप्रकारकान्वयवोधे विशेष्यतया भा
नापत्तिर्दुर्वारैव न च प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासंबंधेन प्रत्ययजन्योपस्थितेर्हेतुत्वोपगमान्नापत्तिः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

श॰वा॰
२०

समूहालम्बनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यताया नाम्न एव जन्यतावच्छेदकत्वादिति वाच्यं स्वज्ञानभेदेन विष
यताभेदाभावाद्यत्र क्वचित्स्त्यादेव लक्षणादिना पुरुषाद्युपस्थितिस्तत्रत्यतादृशोपस्थितिनिरूपितप्रत्ययजन्य
तावच्छेदकीभूतविशेष्यतातः पुरुषादिपदजन्यपुरुषाद्युपस्थितिविशेष्यतायाश्चाभिन्नतया तावताप्युक्तातिप्रसं॰
गवारणासम्भवादिति चेन्न स्वजनकज्ञानीयप्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यताविशिष्टविशेष्यतासम्बन्धेनो
पस्थितेर्हेतुतयोक्तसमूहालम्बनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यतायाश्च तादृशोपस्थितिजनकज्ञानीय॰
प्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यतासामानाधिकरण्यविरहान्नातिप्रसङ्ग इति वदन्ति तदसत् प्रत्ययत्वस्यानुग
तानतिप्रसक्तस्य दुर्वचत्वादुक्तकार्यकारणभावकल्पनायाश्चासंभवात् राजसम्बन्धः पुरुष इत्यादौ संबंधादिपदे॰
ङस्पदत्वादिस्वमत एणायां संबंधादिविशेष्यकराजादिपदार्थप्रकारकान्वयबोधानुपपत्तेः राज्ञः पुरुष इत्यादौ॰
ङस्पदादौ संबंधादिपदत्वभ्रमेऽपि संबंधाद्यंशे राजादिप्रकारकान्वयबोधापत्तेश्च न च प्रत्ययत्वेन ज्ञातपदत्वं तज्ज
न्योपस्थितेः कारणत्वादितद्दोषद्वयस्यानवकाश इति वाच्यम् राज्ञः पुरुष इत्यादौ षष्ठ्यादेः ङस्त्वप्रत्ययत्वाद्यनु
पस्थितिदशायामपि आनुपूर्वीविशेषप्रकारकज्ञानाधीनतत्पदार्थोपस्थितिसत्त्वे शाब्दबोधोत्पत्त्या प्रत्ययत्व॰
प्रकारकज्ञाननिवेशासम्भवात् इदं पुनरत्र तत्त्वम् राजा पुरुष इत्यादौ पुरुषादिविशेष्यकराजादिप्रकारकभेदान्व
यबोधस्याप्रसिद्ध्यैव नापत्तिसम्भवः अथ यत्र षष्ठ्यादिविभक्तेरेव स्वारसिकलक्षणया शक्तिभ्रमेण वा पुरुषाद्युप
स्थितिस्तत्र तद्विशेष्यकराजादिपदार्थप्रकारकभेदान्वयबोधः प्रसिद्ध इति चेन्न तर्हि तादृशबोधे तथाविधप्रकृति॰
प्रत्ययानुपूर्वीविशेषरूपाकांक्षाज्ञानसहकृततत्तद्विभक्तिज्ञानजन्यपुरुषाद्युपस्थितिघटितसामग्र्या एव तादृश
बोधोत्पत्तिनियामकतया तदभावादेव न तदापत्तिः अत एव स्वत्वादिसंबंधेन राजादिविशिष्टपुरुषादितात्पर्यक॰
तदादिपदघटितात्समं दरइत्यादिवाक्यात्पुरुषादिविशेष्यकस्वत्वादिसंसर्गकराजादिप्रकारकशाब्दबोधस्य च प्र॰ २०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

सिद्ध्या राजा पुरुषः सुंदर इत्यादौ पदार्थोपस्थितियोग्यताज्ञानादिबलात्तादृशशाब्दबोधापत्तिरिति निरस्तम् ।
स सुंदर इत्यादिवाक्यार्थशाब्दबोधसामग्र्याः तत्पदत्वाद्यवच्छिन्नविशेष्यकसुंदरादिपदसमभिव्याहारज्ञानसह
कृततदादिपदजन्यतादृशविशिष्टार्थोपस्थितिघटिततया तदभावादेवापत्त्यभावात् अत एव तादृशरीत्या आप
त्तिवारणे राज्ञः पुरुष इत्यादौ स्वत्वादिसंबंधेन पुरुषादौ राजाद्यन्वयबोधस्वीकारेऽपि क्षतिविरहात् उक्तव्यु
त्पत्तिर्निर्युक्तिका विभक्तीनामपि संबंधादिवाचकत्वमपि निर्युक्तिकं नीलो घट इत्यादौ विशेषणवाचकपदस
मभिव्याहृतविभक्तेरिव सर्वविभक्तीनां साधुत्वमात्रार्थकत्वस्यैवोचितत्वात् नहि तथान्वयबोधोपगमे तत विधा ६
त्स्थलीयसामग्रीबलाद्राजा पुरुष इत्यादावपि तथाविधान्वयबोधप्रसंगः संभवति तत्स्थलीयसामग्र्याः
वच्छेदेन राजपदत्वाद्यवच्छिन्नधर्मिकपुरुषादिपदसमभिव्याहाररूपाकांक्षाज्ञानघटिततया तदभावादेव तत्र
तादृशसामग्र्या अभावात् एवं राजपुरुष इत्यादिसमासे राजादिपदस्य राजसंबंध्यादिलक्षणास्वीकारे
विषयार्थः तत्र भेदान्वयस्वीकारेऽपि क्षतिविरहात् न च तत्र भेदान्वयबोधाभ्युपगमे तत्स्थलीयसामग्रीब नन
लाद्राजा पुरुष इत्यादावपि तादृशबोधापत्तिरिति वाच्यं तत्स्थलीयशाब्दबोधे राजादिपदाव्यवहितोत्तरपु
रुषादिपदत्वरूपानुपूर्वीविशेषज्ञानस्य हेतुतया ऽसमस्तस्थले पुरुषादिपदस्य विभक्त्यंतरराजादिपदा
व्यवहितत्वात् तादृशानुपूर्वीविशेषज्ञानासंभवेन तत्र तादृशबोधसामग्र्या असिद्धेः न च प्रकृतिप्रत्यया
योरेवानुपूर्वीविशेषस्याकांक्षात्वात् प्रातिपदिकरूपाव्यवधानघटितोक्तानुपूर्वीविशेषज्ञानस्य हेतुत्वा
मेव निष्प्रामाणिकमिति वाच्यं भवन्मतेऽपि राजपुरुष इत्यादौ तादृशसामग्रीबलाद्राजपदार्थराजसंबं ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

वृ॰वा॰ धिपुरुषपदार्थयोरभेदान्वयबोधस्तादृशसामग्रीबलाद्राज्ञः पुरुष इत्यादावपि राजपदस्य राजसंबंध्यादौ ल
क्षणाग्रहसत्त्वे तादृशाभेदान्वयबोधप्रसंगवारणाय तथाविधानुपूर्वीविशेषज्ञानस्य समासजन्यबोधे हेतु
२२ त्वकल्पनस्यावश्यकत्वात् अस्माभिर्भेदान्वयबोध एवैतादृशानुपूर्वीविशेषज्ञानस्य हेतुतायाः कल्पनी
यत्वात् न चोभयमतएव राजसंबंधिनि राजपदस्य स्वारसिकलक्षणाग्रहे सा राजपुरुष इत्यत्र राजसंबं
धिपुरुषयोरभेदान्वयबोधो भवति इयांस्तु विशेषो यदस्मन्मतेऽसौ समासः षष्ठीतत्पुरुषो भवन्मते तु
कर्मधारय इति एवं च पुरुषविशेष्यकाभेदसंसर्गकराजसंबंधिप्रकारकबोधे राजपदाव्यवहितोत्तरपुरुषप
दत्वप्रकारकज्ञानहेतुत्वमुभयवादिसिद्धमेव भेदान्वयबोधे तादृशानुपूर्वीज्ञानहेतुताकल्पनमधिकमिति
वाच्यं उक्ताभेदान्वयबोधे तथाविधानुपूर्वीज्ञानहेतुतायां पर्यायशब्दांतरघटितानुपूर्वीज्ञानजन्यतथावि
धाभेदान्वयबोधे व्यभिचारवारणाय तादृशानुपूर्वीज्ञानानंतर्य्यस्य कार्यतावच्छेदककोटाववश्यं विवेशनी
यतया तत्र विषयनिवेशप्रयोजनाभावेन तादृशकार्यतावच्छेदकस्यैव भेदान्वयबोधसाधारण्येनानुपूर्वी
ज्ञानजन्यभेदान्वयबोधे साधारण्येनापूर्वीहेतुतायामनाधिक्यात् एवं तण्डुलं पचतीत्यादावपि पाकादिरूपधा
त्वर्थे कर्मत्वादिसंबंधेनैव तण्डुलादेरन्वयबोधः स्वीकर्तुमुचितः कर्मत्वादेः पाकाद्यंशे प्रकारत्वे तत्र द्वितीयादेः
शक्तिकल्पने तादृशवाक्यजन्यशाब्दबोधे कर्मत्वादिसंसर्गस्याधिकस्य विषयताकल्पने च गौरवात् न हि
तंडुलं पचतीत्यादिवाक्यजन्यशाब्दसामग्रीबलात् तंडुलः पचतीत्यादावपि न तथाविधान्वयबोधापत्तिः संभ
वति तादृशान्वयबोधे द्वितीयांततंडुलपदत्वाद्यवच्छिन्नधर्मिकपचतीत्यादिसमभिव्याहारज्ञानस्य हेतुतया २२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

तण्डुलः पचतीत्यादौ तादृशसामग्र्यप्रसिद्धेः एवं पचति चैत्र इत्यादावपि कृतिसंबंधेन पाकादेश्चैत्राद्यंशेऽन्वयबो
धस्वीकार उचितः अन्यथोक्तरीत्या गौरवात् तत्र तादृशान्वयबोधस्वीकारे तस्य लीयसामग्रीबलात्पच्यते चैत्रः
पाकश्चैत्र इत्यादौ तथाविधान्वयबोधापत्तेरप्युक्तरीत्यैव वारणसंभवादिति मैवं राज्ञः पुरुष इत्यादौ षष्ठ्या
देः स्वत्वादिवाचकत्वमावश्यकं अन्यथा पुरुषो न राज्ञ इत्यादौ पुरुषे राजस्वत्वाद्यभावबोधानुपपत्तेः न हि
तत्र स्वत्वादिसंबंधावच्छिन्नप्रतियोगिताकराजाद्यभाव एव भासते न तु राजस्वत्वाद्यभाव इति संभवति स्वत्वादि
संबंधस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वेन तत्संबंधावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः अत
एव स्वामित्वादिकं परित्यज्य स्वत्वादेः षष्ठ्यर्थत्वं नवीनाः स्वीकुर्वन्ति स्वामित्वादेः षष्ठ्यर्थत्वे तस्य निरूपकतासं
बंधेन स्वांशेऽन्वयसंभवेऽपि तादृशसंबंधस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वेन तत्संबंधावच्छिन्ना
भावस्य नञा प्रत्यायनासंभवात् आश्रयतासंबंधाद्यवच्छिन्नाभावबोधस्य तादृशसमभिव्याहारस्थलेऽप्यु
पगमे चैत्रादिसंबंधिधनेऽपि आश्रयतासंबंधावच्छिन्नप्रतियोगिताकचैत्रवृत्तिस्वामित्वाभावसत्त्वान्नेदं चै
त्रस्येति प्रयोगापत्तेः न च नञ्समभिव्याहारस्थलानुरोधेन षष्ठ्यादेः स्वत्वादिवाचकत्वेऽपि राज्ञः पुरुष इत्या
दौ षष्ठ्याद्यर्थस्य संसर्गमर्यादया भानमुचितं तस्य प्रकारत्वोपगमे तत्संसर्गाभानकल्पने गौरवात् नञ्सम
भिव्याहारस्यैव तत्प्रकारकबोधनियामकत्वाभ्युपगमेन सामग्रीविरहात् तत्प्रकारकबोधस्य तदसमभिव्या
हारस्थलेऽसंभवादिति वाच्यम् एवं सति नञ्पदं विना यादृशसमभिव्याहारस्थले यत्र धर्मिणि येन संबं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

बोधेन राजस्वविशेषणतया भानं तत्र तत्समभिव्याहारे तत्र धर्मिणि तत्संबंधावच्छिन्नप्रतियोगिताकतद्धर्मा-
मु० भावः प्रतीयत इति सर्वसिद्धनियमापलापापत्तेः एवं राज्ञः पुरुष इत्यादिवाक्यजन्यशाब्दप्रमाणज्ञानानास्कं-
१२ दितबोधदशायां पुरुषो न राज्ञ इत्यादिवाक्यादपि शाब्दबोधापत्तेः स्वत्वाभाववुद्धौ स्वत्वसंसर्गकज्ञानस्य
विरोधित्वे मानाभावात् किंच वृत्त्यनियामकसंबंधस्याभावप्रतियोगितावच्छेदकत्वेपि राज्ञः पुरुष इत्या-
दौ राजस्वत्वादेः प्रकारताभ्युपगमः समुचितः अन्यथा तादृशसमभिव्याहारज्ञानघटितशाब्दसामग्री
काले राजस्वत्वाभाववान् पुरुषस्संदर इत्याकारकविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षवारणाय तत्र तादृश-
कल्पना सामग्र्याः प्रतिबंधकताधिक्येन गौरवात् अस्मन्नये तादृशसमभिव्याहारज्ञानघटितसामग्र्याः राजस्व-
त्वाभाववान्पुरुष इत्यादिबाधाभावघटिततया तत्तत्त्वे विशेष्यतावच्छेदकप्रकारकनिश्चयरूपकारणावि-
रहादेव तथाविधविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षोत्पत्त्यसंभवेन तादृशसामग्र्यास्तत्प्रतिबंधकत्वाकल्प-
नात् अन्यादृशप्रत्यक्षस्थलीयप्रतिबंधकतया च न तत्वमते निर्वाहः अन्यत्रान्यविधप्रत्यक्षेच्छानामुत्तेज वो
कतया तादृशेच्छायामसत्यामुपदर्शितविशिष्टवैशिष्ट्यबोधकत्वप्रकारकेच्छाबलादुपदर्शितविशिष्ट-
वैशिष्ट्यबोधोपपत्तये ऽन्यादृशविषयतया एव तत्र प्रतिबंधतावच्छेदकत्वेनोपगमावश्यकत्वात् न च
स्वत्वादेः प्रकारतामतेपि स्वत्वादिसंबंधावच्छिन्नप्रतियोगिताकराजाद्यभावविशिष्टपुरुषादिवैशि-
ष्ट्यबोधे तथाविधसामग्र्याः प्रतिबंधकत्वाधिक्येन गौरवं तत्संसर्गतामते तु तादृशसामग्र्याः स्व- १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

त्वादिसंबंधावच्छिन्नप्रतियोगिताकराजाद्यभाववत्तानिश्चयाभावघटिततया तत्सत्वे कारणविरहादेव तथाविध
प्रत्यक्षत्वारणासंभवादिति वाच्यं मन्मते तादृशप्रत्यक्षं प्रति तथाविधसामग्र्याः प्रतिबंधकताधिक्येपि निरूपितत्वा
दिसंबंधावच्छिन्नप्रतियोगिताकराजाद्यभावविशिष्टस्वत्वादिवैशिष्ट्यबोधे तथाविधसामग्र्याः प्रतिबंधकत्वा
कल्पनेन तदंशे साम्यात् तथा च पूर्वोक्तराजस्वत्वाभाववान्पुरुषस्सुंदर इत्यादि विशिष्टवैशिष्ट्यप्रत्यक्षं प्रति रा
ज्ञः पुरुष इत्यादिशाब्दसामग्र्याः प्रतिबंधकत्वकल्पने संसर्गतावादिमतेऽधिकमिति न स्वत्वादिप्रकारतामते
घटप्रत्यक्षादिकं प्रति तादृशसामग्रीप्रतिबंधकतायां विभक्तिजन्यस्वत्वाद्युपस्थितिनिवेशाधिक्येन राजस्व
त्वाभाववान्पुरुष इत्यादिबाधाभावनिवेशाधिक्येन च गौरवे तन्मते तादृशोपस्थितितथाविधबाधाभावा
दीनां तथाविधवाक्यजन्यशाब्दबोधं प्रत्यहेतुतया तादृशवाक्यघटितसामग्रीप्रतिबंधकतायां तेषामनिवेशा
दिति वाच्यं भवन्मतेपि स्वत्वादिसंबंधावच्छिन्नप्रतियोगिताकराजाभावव्याप्यराजस्वत्वाभाववान्पुरुष इत्या
दिनिश्चयस्य तदभावव्याप्यवत्तानिश्चयमुद्रया तादृशवाक्यजन्यशाब्दधीविरोधितया तादृशनिश्चयाभावस्य
तथाविधशाब्दसामग्रीप्रतिबंधकतायां निवेशेनास्याधिक्येन लाघवानवकाशात् मन्मते राजस्वत्वाभाववा
न्पुरुष इत्यादिबाधाभावनिवेशेनैव तादृशनिश्चयकाले प्रत्यक्षाद्युपपत्तेस्तदभावानिवेशात् यत्तु राज्ञः
पुरुष इत्यादौ राजस्वत्ववान्पुरुष इत्याद्यन्वयबोधोपगमे राजकीयस्वत्वे राजस्वत्ववान्पुरुष इत्याकारकद्वि
विधानुमितेरेव तदतिरिक्ताविषयकत्वेन तथाविधानुमितिं प्रति प्रत्येकं तादृशवाक्यघटितसामग्र्याः प्रति
बंधकता तद्द्वये स्वातंत्र्येण च तादृशानुमित्योस्तथाविधवाक्यजन्याद्राजकीयः पुरुष इत्यादिशाब्दबोधादति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

भेदे

श॰ वा॰ रिक्तविषयकतया तत्र तादृशसामग्र्याः प्रतिबंधकत्वकल्पने नास्ति तथाविधानुमितितथाविधशाब्दसामग्र्योः सत्वेऽ
नुमितेरेवोत्पत्तेरपि तु राजकीयः पुरुष इत्याकारकस्वत्वसंसर्गकैकविधानुमितिं प्रत्येव तादृशसामग्र्याः प्रतिबंधक
१३ त्वं कल्पनीयमिति लाघवमिति न दृष्यं किंचित्करम् भवन्मते यत्र यादृशानुमितिः स्वीक्रियते तन्मतेऽपि तत्र तादृशा
नुमितेः स्वीकरणीयतया अनुमितौ शाब्दसामग्र्याः प्रतिबंधतासाम्यात् उपदर्शितस्थले भवद्भिरनुमितिः स्वीक्रियते क
अस्माभिरपि स्वीक्रियते इति कुतः प्रतिबंधकताद्वयकल्पनमिति भवतापि तादृशशाब्दं प्रति अनुमितिसामग्रीद्वयस्य
प्रतिबंधकताया आवश्यकतया साम्याच्च एवं राजपुरुष इत्यादिसमासवाक्यात्स्वत्वसंसर्गकशाब्दबोधस्वीकारे तादृशशा
ब्दसामग्र्याः स्वत्वसंसर्गेण राजविशिष्टपुरुषतात्पर्यज्ञानादिघटितया भिन्नविषयकेऽपत्यत्वादिके प्रतिप्रतिबंध
कत्वाधिक्येन गौरवात् तत्र राजसंबंधिप्रकारकाभेदान्वयबोधस्वीकारस्यैवोचितत्वात् भवन्मतेऽपि तादृशाभेदान्व
यबोधसामग्र्याः प्रतिबंधकत्वाधिक्येन गौरवमिति लिवाच्यं राजपदस्य राजसंबंधिनि स्वारसिकलक्षणाग्रहदशायां अभे
दसंबंधेन राजसंबंधिविशिष्टपुरुषे तात्पर्यग्रहसत्त्वे भवन्मतेऽपि कर्मधारयत्वेनाभिमततत्तथाविधसमासवाक्यात्ता
दृशबोधस्वीकारस्यावश्यकतया तादृशसामग्र्याः प्रतिबंधकताया उभयमतसिद्धत्वात् यत्तु दधिपश्येत्यादौ लुप्त
द्वितीयाविभक्तिस्मरणेन दधिकर्मकदर्शनबोधवत् राजपुरुष इत्यादावपि लुप्तषष्ठीविभक्तिस्मरणेन राजसंबं
धप्रकारकाभेदान्वयबोधनिर्वाहे राजसंबंधिनि लक्षणास्वीकृत्याभेदान्वयबोधोपगमो निरर्थकः न च ष
ष्ठीतत्पुरुषादिस्थलेऽपि लुप्तविभक्तिस्मरणाभावेऽन्वयबोधस्तत्र राजन्नुस्य राजमातंगा इत्यादिप्रयोगापत्तिः
तत्र मातंगादौ राजादीनामन्वयबोधोपपत्तये राजादिपदोत्तरं षष्ठ्यादिविभक्त्यनुसंधानस्यावश्यकत्वे समानवि १३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

भक्तिकतया राजादौ रूढ्यादिपदार्थस्याभेदान्वयबोधसंभवादिति वाच्यं यतस्तत्र रूढ्या राजादीनामभेदान्वयानुप
पत्त्यानामभियुक्तानामप्रयोगः अपितु लक्षणया यदेकपदस्यापेक्षितत्वया राजपदस्य लक्षणयातिदेशात समासासाधु।
त्वेन तत्सापेक्षत्वं च तदर्थान्वितस्वार्थपरत्वं स्वार्थस्य स्वीयवृत्तिग्रहविशेष्यः अत एव शरैः शातितपत्रः चैत्रस्य दास
भार्येत्यादौ न समस्यमानशातितदासपदार्थैः सापेक्षता तदर्थैकदेशशातनदासत्वादेव परस्परकरणकत्व चैत्रनिरूपित दा
त्वादीनामन्वयात् तदर्थान्वितेतरत्राभेदान्वयो वा निवेशनीय इति तदसत् स्वारसिकलक्षणाग्रहस्थलानुरोधेन।
बोध तादृशसमभिव्याहारज्ञानादेस्तथाविधजनकतायाः क्लृप्तत्वात्तत्र निरूढलक्षणास्वीकारे गौरवाभावात् न च स्वा
रसिकलक्षणाग्रहस्थले तादृशान्वयबोधस्योभयवादिसिद्धत्वेपि निरूढलक्षणामते तत्संबंधिताप्रत्ययस्यानादित्व
कल्पनायां गौरवं अनादितात्पर्यविषयीभूतार्थे निरूढलक्षणाया एव निरूढलक्षणात्वादिति वाच्यं राजपुरुष इत्या
दिवाक्यजन्यशाब्दबोधात्पूर्वं नियमतो लुप्तविभक्तिस्मरणकल्पनापेक्षया तात्पर्यानादित्वकल्पनायां गौरवावि
रहादिति न चैवं दधि पश्यतीत्यादावपि दध्यादिपदस्य दधिकर्मकादौ लक्षणां स्वीकृत्य धात्वर्थेन समं तस्याभेदा।
न्वयबोधोपपादनसंभवात्तत्रापि लुप्तविभक्तिस्मरणकल्पनमनुचितमिति वाच्यं दध्यादिपदस्य दधिकर्म।
कादौ लक्षणाग्रहदशायामपि तस्याहुतीयेतरविभक्त्यंतत्वभ्रमदशायां दधिकर्मकः पश्यति दधिकर्मकेन पश्य
तीत्यादाविव उक्तस्थलेपि दधिकर्मकदर्शनान्वयबोधानुदयात् भवन्मतेपि दधि पश्यतीत्यादिस्थलीयदधि।
पदोत्तरपश्यतीत्यादिपदत्वरूपानुपूर्वीज्ञानादिघटितसामग्रीसत्त्वात् दधिकर्मकान्वयबोधस्यापत्तेरिति द्वि।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

स्व॰ वा॰
२४

तीयांतरद्ध्यादिपदत्वावच्छिन्नधर्मिकतादृशाधात्वादिसमभिव्याहारज्ञानस्य तादृशान्वयबोधहेतुतायाश्चावश्य-
कत्वात् दधिपचपतीत्यादौ त्वनुपस्थितीयानुसंधानस्यावश्यकत्वात् राजसंबंधिपुरुषाद्यन्वयबोधे वराजादिप-
दाव्यवहितोत्तरपुरुषादिपदत्वप्रकारकज्ञानस्य हेतुतायाः स्वारसिकलक्षणाग्रहस्थलानुरोधेनावश्यक-
ल्पनीयतया राजपुरुषइत्यादौ राजादिपदस्य तृतीयाद्यंतत्वभ्रमदशायां राजसंबंधिपुरुषाद्यन्वयबोधापत्त्य-
संभवान्न तृतीयादिविभक्त्याद्यव्यवधानात् दधिपचपतीत्यादौ दधिपदाव्यवहितोत्तरत्वप्रकारकधात्वनुपदज्ञानस्य हे-
तुतायाश्चक्लृप्तत्वात् पचपति दधिपचपति दधिचैत्रो दधिरित्यादावपि दधिकर्मकदर्शनान्वयबोधात् तादृशज्ञानहेत-
तायाश्च एकस्य कल्पनीयत्वाच्चेति तंडुलं पचतीत्यादौ तंडुलादिपदस्यैव तंडुलादिकर्मके लक्षणा विभक्तिस्तु साधु-
त्वार्था एवं राज्ञः पुरुष इत्यादावपि राजादिपदस्य संबंध्यादौ लक्षणा विभक्तिः साधुत्वार्था न तु द्विभक्त्यंतसमभि-
व्याहारस्य न तु लक्षणाकार्यबोधनियामकत्वान्नातिप्रसंगः विभक्तेरेव प्रकृत्यर्थविशेषितस्वार्थे लक्षणा-
ति तु न संभवति विभक्तेः कुत्रापि शक्तेरक्लृप्ततया तत्रैकस्य संबंधरूपलक्षणायाश्चासंभवान्नीलं रूपं तंडुलः
प्रमेय इत्यादौ विभक्त्यर्थासिद्धिस्तस्यैव प्रकृत्यर्थस्य भानात् प्रकृतिशक्तेः स्वार्थे क्लृप्ततया तत्र लक्षणासंभ-
वात् इति तु चिंतनीयं राजादिपदस्य राजसंबंध्यादिपराक्तत्वभ्रमदशायामिव तदर्थलक्षणाग्रहदशायामपि रा-
जसंबंधिनः पुरुष इत्यादाविव राजसंबंधि संबंधी पुरुष इत्याद्यन्वयबोधस्य सर्वजनानुभवसिद्धत्वात् पच-
ति चैत्र इत्यादावपि कृतिसंबंधेन पाकादेः चैत्रादौ विशेषणत्वोपगमे न पचतीत्यादावन्वयबोधानुपपत्तिः २४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

इष्टव्याकृतिसंबंधस्यापि वृत्तिनियामकतया तत्संबंधावच्छिन्नाभावाप्रसिद्ध्या तद्बोधनासंभवात् अथैवम
पि चैत्रो जानातीत्यादौ चैत्राद्यंशे ज्ञानादेराश्रयतासंबंधेनान्वयबोधोपगमेपि तत्तति विरहः स्वाश्रयतासं
बंधस्याभावप्रतियोगितावच्छेदकतया न जानाति चैत्र इत्यादौ स्वाश्रयतासंबंधावच्छिन्नप्रतियोगिताक
ज्ञानाद्यभावस्यैव मानसंभवात् न चात्र तत्र आख्यातस्याश्रयत्वार्थकत्वे निर्युक्तिकं न च धात्वर्थज्ञानाद्यभो
देराश्रयतासंबंधेन चैत्रादिरूपप्रातिपदिकार्थे साक्षात्प्रकारत्वोपगमे ज्ञाने चैत्र इत्यादावपि तथान्वयबो
धापत्तिरिति वाच्यं तादृशान्वयबोधे आख्यातोत्तरधातुसमभिव्याहारज्ञानस्य हेतुत्वात् भवतोप्याश्रयताप्रका
रकबोधे तादृशसमभिव्याहारज्ञानहेतुताया आवश्यकत्वात् यत्तु पचति चैत्र इत्यादौ पाककृतिमांश्चैत्र इत्या
द्याकारकाख्यातार्थप्रकारकशाब्दबोधोत्पत्त्या तत्राख्यातजन्यकृत्युपस्थितेर्हेतुत्वकल्पनमावश्यकम् तथा
च तत्तदर्थविशेष्यान्निवेशप्यात्तन्निरूपत्वासत्त्यापदार्थोपस्थितेर्हेतुत्वकल्पने शक्यलक्ष्यसहस्रार्थभेदेना
ख्यातजन्योपस्थितेः कारणताबाहुल्यमित्यर्थविशेष्यानन्निवेशप्य धात्वर्थप्रकारकान्वयबोधं प्रति तदव्यव
हितोत्तरप्रत्ययजन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्यैव हेतुत्वं उपेयते तथा च तादृशकारणबाधेन चैत्रा
देर्धात्वर्थज्ञानविशेष्यतयाभानेन न संभवति यदि च धातुत्वप्रत्ययत्वादीनामननुगतानां दुर्वचत्वेन न तयाने
तादृशानुगतकार्यकारणभावकल्पने संभवतीति मन्यते तदापि यत्र ज्ञा धातोरेव पाकादौ लक्षणा तत्र
जानातीत्यादिवाक्यात्पाककृत्यादिप्रकारकान्वयबोधोत्पत्त्या हेतुतायास्तत्र कल्पनीयतया तादृशकारण

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

बाधाद्वैत्रो ज्ञानातीत्यादौ चैत्रादेर्ज्ञानादिविशेष्यतयाभानानुपपत्तिर्दुर्वारैवेति तदप्यसत् मत्पर्यायांतरा-
र्थविशेष्यकशाब्दबोधे व्यभिचारवारणाय तादृशोपस्थितिवैशिष्ट्यस्य तादृशोपस्थितिकार्यतावच्छेदकको-
टावश्यं निवेशनीयतया तदनुत्तरशाब्दबोधे चैत्रादेर्ज्ञानादिविशेष्यतयाभानेन तादृशकार्यताबाधस्या-
किंचित्करत्वात् तादृशानुपूर्वीघटकज्ञानादिधातुजन्यज्ञानाद्युपस्थिति चैत्रादिरूपविशेष्योपस्थितियोग्यता
ज्ञानादिघटितसामग्र्या आश्रयतासंसर्गकशाब्दबोधजनने बाधकाभावात् नचैतन्मते आश्रयतासंबं-
धेन ज्ञानप्रकारकशाब्दबोधे तादृशयोग्यताज्ञानहेतुत्वांतरकल्पनाधिक्यं आश्रयतासंबंधेन ज्ञान-
विशिष्टचैत्रादितात्पर्यकात् सर्वनाम्नः सांकेतिकपदांतराद्वा तादृशसंबंधेन ज्ञानादिप्रकारकचैत्रादि-
विशेष्यकशाब्दबोधस्य सर्वमतएव प्रसिद्धावपि तादृशशाब्दबोधे पदार्थांतरभानानपेक्षत्वेन तद्विशिष्टतयो-
ग्यताज्ञानस्य तत्र हेतुत्वेऽपि आश्रयविषयकत्वात् ज्ञानादिविशिष्टचैत्रादिमात्रविषयकयोग्यताज्ञानस्य ज्ञा-
नादिविशिष्टचैत्रादिविषयकशाब्दबोधे हेतुतायाः कुत्राप्यक्लृप्तत्वादिति वाच्यं भवन्मतेऽपि ज्ञानाश्रय-
ताप्रकारकचैत्रादिविशेष्यकशाब्दबोधे तत्पदविषययोग्यताज्ञानहेतुताया आधिक्यात् आश्रयता-
संसर्गकज्ञानीयकारणतावच्छेदकस्य तदीयसंसर्गविषयताघटिततत्प्रकारकज्ञानत्वरूपकारणता-
वच्छेदकापेक्षया लघुशरीरतया आश्रयतायाः संसर्गतामतस्यैव लघुत्वात् नच यत्राश्रयत्वेन ज्ञा-
धात्वर्थसमभिव्याहृताख्यातस्य शक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा तत्र ज्ञानाश्रयताप्रकारक-

बोधस्योभयाभावत्तस्मिन्नन्वयातत्त्वेताटृशयोग्यताज्ञानहेतुत्वमुभयमतसिद्धमेवेतिवाच्यं आश्रयतायाः संसर्गत्व
वादिनातत्राप्याश्रयताप्रकारकबोधस्यानभ्युपगंतव्यत्वादितिचेत्सत्यमेतदभिप्रायेणैवज्ञानावतीत्यादावाख्या
तस्यनिरर्थकतांमणिकारउक्तरीचकार तत्राश्रयत्वेनिरूढलक्षणामभ्युपगच्छतांदीधितिकाराणांपुनरेषआ
शयः यत्रज्ञाधातोर्ज्ञानाश्रयत्वेशक्तिभ्रमः स्वारसिकलक्षणाग्रहोवा तत्रचैत्राद्यंशेधात्वर्थैकदेशस्यज्ञाना
देरन्वयानुपपत्त्यास्वरूपसंबंधेनज्ञानाश्रयताप्रकारकचैत्रादिविशेष्यकान्वयबोधएवतत्रमणिकृतास्वीकरणी
यः तस्यचतत्रज्ञानाश्रयताप्रकारकशाब्दबोधेतत्प्रकारकयोग्यताज्ञानहेतुतायाः क्लृप्तत्वात् आश्रयतासंसर्गकशा
ब्दबोधेताटृशयोग्यताज्ञानहेतुताकल्पनमधिकमेवमणिकृन्मतेनतुदीधितिकृन्मतेताटृशयोग्यताज्ञानत्वेन।
हेतुत्वाकल्पनेलाघवेपिज्ञानातीत्यादावानुपूर्वीज्ञानघटितज्ञाधातुशक्तिज्ञानजन्यज्ञानोपस्थितिघटितशाब्दसा
मग्र्याः भिन्नविषयकप्रत्यक्षादिकंप्रतिप्रतिबंधकतायां आश्यात्तज्जन्याश्रयत्वोपस्थितिनिवेशाधिक्यात् गौरव।
मितिवाच्यं भवन्मतेपिज्ञानाश्रयत्वाभाववान्चैत्रः संदेहः इत्यादिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षेज्ञानातिचैत्रइत्या।
द्यानुपूर्वीज्ञानघटितज्ञाधातुजन्यज्ञानोपस्थितिघटितसामग्र्याः प्रतिबंधकताधिक्येनगौरवात् मन्मतेविरोधि।
ज्ञानाश्रयत्वाभाववत्तानिश्चय[illegible]घटिततथाविधविशिष्टवैशिष्ट्यबोधसामग्र्यास्ताटृशसामग्र्याः समयुगापद
वस्थानासंभवेनताटृशप्रतिबंधकत्वकल्पनाविरहात येषंदूषितंदिशावसेयं अत एवं रीत्याभूतलेनघटइत्यादौघ।
टादिपदस्यघटप्रतियोगिकाटौतदुत्तरसप्तमीविभक्तेरेववाप्रतियोगितायांलक्षणामभ्युपेत्यतत्रघटप्रतियोगिकाभावोः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

मु·वा· भूतलवृत्तिरित्याकारकप्रतियोगिताप्रकारकशाब्दबोधोपगमस्यैवसमुचितः तथा सति तथाविधसमभिव्याहार
ज्ञानघटितसामग्र्याघटप्रतियोगिकत्वाभाववानभावः प्रमेय इत्यादिविशिष्टवैशिष्ट्यबुद्धिं प्रति प्रतिबन्धकत्वा
२६ कल्पनेन लाघवादित्युक्तनियमे निपातातिरिक्तविशेषणवैयर्थ्यमिति चेन्न भूतलेन घट इत्यादौ घटाद्य
भावे भूतलाद्यन्वितसप्तम्यर्थाधेयत्वस्यैव तात्पर्यविषयतया घटादौ संसर्गतात्पर्ये भूतलादिवृत्तित्वाभावस्यैवान्व
यबोधोऽप्यनुभवसिद्धः अन्यथा तादृशवाक्यजन्याप्रामाण्यज्ञानानास्कन्दितबोधस्य भूतले घट इत्यादिवाक्य
जन्यघटादिविशेष्यकभूतलाद्याधेयत्वप्रकारकबोधविरोधितायाः सर्वानुभवसिद्धाया अनुपपत्तेः नन्वेवं वि
नायत्रधर्मिणि यस्य विशेषणतया भानेन तादृशसमभिव्याहाराद्वर्तमानतादृशसमभिव्याहारस्थले नञस्तत्वे त
त्र धर्मिणि तदभावः प्रतीयत इत्यनुभवापलापप्रसङ्गाच्च एवं च नञर्थाभावेऽनुयोगितया घटाद्यन्वयबोधो
पपत्तये निपातातिरिक्तत्वविशेषणमावश्यकं एवं च पचति चैत्रः चैत्रस्य न धनमित्यादौ पाककृतिचैत्रस्वत्वाद्य
भावस्य नञर्थस्य चैत्रधनादावन्वयबोधोपपत्तये घटो न पट इत्यादावपि नञर्थघटादिभेदस्यान्वयबोधोपप
त्तये तदावश्यकं न चोक्तस्थलेषु नञोऽभाववल्लाक्षणिकतयाऽभाववत्तासमनुयोगितोऽभेदान्वयबोधा
एव तत्रोपेयतामिति वाच्यं तथा सति सर्वत्राभाववत एव नञर्थतया मुख्यार्थपरनञोऽतिदुर्लभत्वापत्तेः अभावस्य
भेदान्वयबोधोपगमेऽपि कार्यकारणभावकल्पनाधिक्यविरहेणाभाववति लक्षणानौचित्यात् अभाववतो
भेदान्वयबोधोपगमे भूतले घट इत्यादिवाक्यजन्यबोधे भूतलेन घट इत्यादिवाक्यजन्यबोधस्याविरोधिता। २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

पत्तेश्च लाघवात्स्वरूपसंबंधेन गगनाभावनिरूपितस्यैव विशिष्टबुद्धिविरोधित्वान्न तत्त्वभेदसंसर्गकघटाभावा
श्रयघटकारकत्वनिश्चयस्येति नीलो घट इत्यादौ विशेषणविभक्तेरभेदार्थकत्वमतेपि घटाद्युक्तेरित्यालाघवं संभव
ति तथापि तत्रापि ननो विशेषः इति दिक् प्रत्ययाश्च विभक्तिकृत्तद्धितादिभेदेन नानाविधाः विभक्तिश्च सुप्तिङ्भे
देन द्विविधा सुब्विभक्तयश्च प्रथमाद्वितीयादयः सप्त तत्र प्रथमार्थः प्रकृत्यर्थविशेषणविधया स्वान्वयिनी संख्यैव
अत एव यत्र विशेष्यवाचके समानविभक्तिके निपातपदं वा नास्ति तत्र प्रथमोत्तरार्थस्य विशेषणतया भासकसाम
ग्र्यभावात् सोमसुत्यविशेष्यत्यैव भासते संख्यावाचकानां च एकवचनद्विवचनबहुवचनानामेकत्वत्वद्वित्वत्वबहुत्व
त्वावच्छिन्नेषु शक्तिः शक्तता च सुत्वऔत्वजस्त्वादिना न तु सुप्तिङ्साधारणैकवचनत्वादिना एकवचनत्वादेर्दु
र्वचत्वात् न चैकत्वादिवाचकत्वे न तत् एकत्वादिवाचकतायाः शक्तता रूपत्वे आत्माश्रयप्रसंगात् बोधकता रूपत्वे
शक्तिभ्रमेणाद्विवचनादीनामपि एकत्वबोधकताया अतिप्रसक्तत्वात् न चैकवचनत्वादिकं जातिविशेषः सुत्वादि
ना संकरात् न च शक्तिसंबंधेनैकवचनादिपदवत्त्वे तत्तत् तदज्ञानेपि आपाततः सुत्वादिना शक्तिभ्रमात् एव शाब्दबोधः
एकवचनादिशब्दस्य पटद्वयात्मकतया तादृशसमुदायशक्तेरेवाप्रसिद्धेरिति तु नाशंकनीयं एकवक्तीत्यादिव्युत्पत्त्या
एकवचनादिशब्दस्य स्वादिबोधकत्वे एकादिशब्देपि तादृशव्यवहारापत्तेः एकवचनादिशब्दस्य स्वादौ शक्तिः सौकार
स्यावघटकत्वादिति वाच्यं तथ्यकारीयसंकेतेनैवोपपत्तौ एकवचनादिपदे शक्तेरप्रामाणिकत्वात् तान्येकवचन
द्विवचनेत्यादिपाणिनिसूत्रस्य तदीयसंकेतग्राहकतयाप्युपपत्तेः नहि सख्यारघ्योनदीत्यनुशासनात् सख्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

व्यु॰वा॰
१६

स्वोऽईदृदं तादृशत्वेन घटादिपदस्य शक्तिः सिद्ध्यति किंतु तदीयसंकेताव अत एव नद्यादिसंज्ञाः आधुनिकसंकेतश्रा
लित्वात् पारिभाषिका एव नत्वौपाधिकाः अथैवमपि पाणिनिसंकेतसंकेतसंबंधेन तादृशपदवत्त्वमेव वा
कत्वादिप्रकारतावच्छेदकमस्त्विति चेन्न तादृशसंकेतस्य केनचिद्रूपेणासंबंधतासंकेतत्वेन चेन्न हि कस्यचित्संस्मा
एकवचनपदादिनौ जसादिर्वोद्धव्य इत्याकारकसंकेतस्यापि संभवादतिप्रसक्तिर्दुर्वारैव पाणिनिसंकेतत्वेन त
थेति चेन्न हि व्याकरणप्रणेतृपुरुषांतरस्यापि तादृशसंकेतसंभवात् तदीयसंकेतसंबंधेन तत्सत्त्वस्य ङस्यादिपदा
त्वौ जसादिर्वोद्धव्य इत्याकारकपुरुषविशेषसंकेतसंबंधेन ङस्यादिपदवत्त्वस्य च विनिगमनाविरहेण एकत्वप्र
कारतावच्छेदकत्वप्रसंगात्तत्पाणिनीयत्वानुपूर्वीविशेषणावशक्ततावच्छेदक इति यत्तु संख्यापि प्रकृत्यर्थः एकवचना
दिकं च एकत्वाद्यर्थे तात्पर्यग्राहकमेव न चैवमेकपदोपस्थाप्ययोरर्थयोः परस्परमन्वये आकांक्षाविरहा
त् घटादावेकत्वाद्यन्वयानुपपत्तिः अन्वयव्याहतत्वाद्विपदादुपस्थितयोरसमस्तार्थयोराधाराधेयभावेनान्वयाप
त्तेः घटादिपदस्य एकत्वादिविशिष्टघटादौ च न शक्तिसंभवः घटत्वरूपपरस्परत्यागेऽसंख्यानवच्छिन्नघटादेरेवान्व
यबोधादिति वाच्यं आकांक्षावैचित्र्यादेकपदोपस्थाप्ययोरपि घटैकत्वयोः परस्परमन्वयसंभवात् अत एव
खंडशक्तौ वकारादुपस्थाप्ययोरन्ययोराद्यवच्छेदाद्योः परस्परमन्वयबोधः न चैवं कर्मत्वादिकमपि प्रकृत्या
र्थ एवास्तु किं तत्र द्वितीयादिप्रत्ययेनेति वाच्यं नामार्थधात्वर्थयोः साक्षाद्भेदान्वयबोधस्याव्युत्पन्नतया कर्म
त्वादेर्नामार्थत्वे तेन समं धात्वर्थान्वयासंभवात् न च संख्यायाः प्रातिपदिकार्थत्वे सति तात्पर्यज्ञानेविने १६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

वशाक्लिभ्रमे लक्षणामहं च द्विवचनाद्युत्तरपदादेकत्वबोधसंभवात् एकत्वादितात्पर्येणैकवचनोत्तरस्येव द्विवच
नाद्युत्तरस्यापि पदस्य स्वारसिकप्रयोगापत्तिरिति वाच्यं अनादितात्पर्यस्यैव स्वारसिकप्रयोगमूलत्वात् एकव
चनाद्युत्तरपदस्यैव एकत्वादावनादितात्पर्यं परामर्शेनातिप्रसंगविरहात् द्वौ कपोतौ द्विवचनैकवचने इत्याद्यनु
शासने वचनाहृत्यार्थे तात्पर्यग्राहकमेवेति वैयाकरणमते तदसत् अनन्तानां प्रकृत्यानुपूर्व्याणां शक्ततावच्छेद
कत्वापेक्षया अल्पतरविभक्त्यानुपूर्व्याणामेकत्वादिशक्ततावच्छेदकत्वस्यैवोचितत्वात् न च प्रातिपदिकत्व
मेव तच्छक्ततावच्छेदकं न तु घटपदत्वपटपदत्वादिकमिति न शक्यानन्त्यमिति वाच्यं प्रातिपदिकत्वस्य दुर्वच
त्वात् तदज्ञानेऽप्येकत्वादिबोधस्यानुभवसिद्धत्वाच्च पदत्वेन वर्णत्वेन वा शक्तत्वे विभक्तेरपि तद्वाचकताप्रसि
द्धेः एकत्वादिशाब्दबोधात् सर्ववर्णत्वाद्युपस्थितेरप्यनावश्यकत्वाच्च फलानुरोधेन तत्कल्पने च कल्प
नागौरवात् एवमानुपूर्वीभिन्नधर्मस्य वाचकतावच्छेदकत्वे घटपदं सुपदं च न संख्यावाचकमिति विपरी
तनिश्चयकालेऽपि तादृशधर्मावच्छिन्नस्य वाचकताग्रहसंभवात् घट इत्यादौ संख्याबोधापत्तिः अथ वि
भक्तीनां संख्यार्थकतामते प्रकृतिविभक्त्योरेकवाक्यताविरहनिश्चयदशायां विभक्त्युपस्थाप्यस्यैकत्वा
देः प्रकृत्यर्थेऽन्वयबोधवारणाय तयोः समभिव्याहारस्य ज्ञानस्य घटादिविशेष्यकैकत्वाद्यन्वयबोध
प्रतिकारणत्वमधिकं कल्पनीयं एकपदोपस्थापितयोरर्थयोरेकत्वाद्योरन्वयबोधोपगमे च न समभिव्या
हारज्ञानस्य तत्र हेतुताकल्पनमिति लाघवात् प्रकृत्यानुपूर्व्याणां संख्यावाचकतावच्छेदकत्वमुपेयत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

इति चेन्न आकांक्षाविचारे समभिव्याहारज्ञानहेतुताया निराकृतत्वात् अथैवमपि विभक्तेः संख्यार्थकत्वे
व्यु॰वा॰ विनिगमनाविरहेण प्रकृतिधर्मिकस्य विभक्तिधर्मिकस्य च संख्याप्रकारकान्वयबोधपरत्वज्ञानस्य
१८ हेतुता कल्पनीया विभक्तेर्द्योतकत्वे तु विभक्तौ तात्पर्यविरहेण प्रकृतिधर्मिकमेव तात्पर्यज्ञानं तादृ
शान्वयधीहेतुरिति लाघवमिति चेन्न विभक्तेः संख्यावाचकताविरहेपि प्रकृतिविभक्त्योरानुपूर्वीज्ञान
स्य तादृशान्वयबोधहेतुताया निर्विभक्तिकादिपदज्ञानादन्वयधीवारणाय अवश्यं कल्पनीयतया संख्या
वाचकप्रकृतिविभक्त्योरानुपूर्वीज्ञानस्य तादृशान्वयबोधहेतुताया निर्विभक्तिकादितद्वाचकप्रकृ
तेरिव तद्वाचकविभक्तेरपि संख्यान्वयबोधकत्वप्रकारकेच्छाविषयत्वरूपतादृशबोधपरत्वसंभवेन वि
भक्तिधर्मिकतादृशज्ञानहेतुतायां विनिगमनाविरहादावश्यकत्वात् अथ प्रथमस्वादीनां संख्यावाचकत्व
कल्पनायां प्रकृतेस्तत्र लक्षणैवोचिता शक्यलक्ष्ययोः परस्परमन्वयोपगमे तु तद्विरहात् प्रथ
माविभक्तेः कुत्रापि शक्तेरक्लृप्ततया तस्याः शक्यसंबंधरूपलक्षणा न संभवति द्वितीयादेः कर्मत्वादौ
शक्तत्वेपि तादृशविभक्तेस्तत्समभिव्याहृतप्रकृतेर्वा संख्यायां लक्षणा इत्यत्र विनिगमकं दुर्लभं न चै
कत्वाद्यन्वयबोधे घटपदादिज्ञानजन्योपस्थितित्वेनानंतहेतुताकल्पनमपेक्ष्य स्वादिपदज्ञानं तदुप
स्थितित्वेन कतिपयहेतुताकल्पनायां लाघवात् कतिपयशक्तिकल्पने गौरवमकिंचित्करं सामान्य १८
जन्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

तःपदवृत्तिज्ञानजन्यतदुपस्थितित्वेनैककारणताकल्पनेनतु न सम्यक् निर्विभक्तिककुंभपदादितः संख्योपस्थितौ
तदगृहीतवृत्तिकघटादिपदे तद्विभक्त्यंतत्वज्ञानवतः पुंसो घटादौ संख्यान्वयबोधप्रसंगात् घटपदादिज्ञानज
न्यएकत्वाद्युपस्थितित्वेनैकत्वादिविषयकशाब्दबोधहेतुतां कल्पयित्वा विभक्तिघटादिपदानुपूर्वीज्ञानता
दृशोपस्थित्योः परस्परसहकारेण फलजनकतायाः अवश्यमभ्युपेयत्वादिति वाच्यं घटादिपदस्यैकत्वादौ ल
क्षणासहसत्त्वे घटः प्रमेय इत्यादिवाक्यादेकत्वे प्रमेयमित्याद्यन्वयबोधस्य सर्वमतसिद्धतया तदनुरोधेनैक
त्वादिविषयकशाब्दबोधे घटादिपदजन्यैकत्वाद्युपस्थितित्वेन हेतुतायाः सर्वसंमतत्वान्नैवं यादृशयादृशपदा
नोल्लक्षणया एकत्वादिशाब्दधीजनकत्वं तोभयवादिसिद्धं तादृशानेन पदज्ञानजन्यैकत्वाद्युपस्थितीनां तच्छा
ब्दबोधहेतुत्वकल्पने प्रकृते संख्यावाचकतावादिनामधिकमिति तत्कल्पनापेक्षया चाल्पतरत्वादिपदज्ञानज
न्यैकत्वाद्युपस्थितिहेतुताकल्पनएव लाघवमेतेन संख्याविशेषावच्छिन्नघटादिलक्षणया प्रकृतेऽर्थः नतु
संख्याविभक्त्यर्थः शाब्दबोधे विभक्तिजन्यसंख्योपस्थितिहेतुताकल्पनाधिक्येन गौरवात् घटादिपदस्यैकत्वादि
विशिष्टघटादौ लक्षणा न हृदयंगमा सर्वमतएव तज्जन्यविशिष्टविषयकोपस्थित्या विशिष्टविषयकशाब्दधीर्
जननात्तथाविधोपस्थितिहेतुतायाः सर्वानुमतत्वात् पदांतरसमभिव्याहृतान घटादिपदादेकत्वादिविशिष्ट
घटादिशाब्दबोधस्त्वलौकिक एवेति तद्विषयकस्मरणस्य तत्रोपगमात् तथाचोक्तं सर्ववाक्यं क्रियायां परिसमा
प्यत इत्यपि निरस्तं यादृशपदानां लक्षणया एक[illegible]त्वादिविशिष्टस्यार्थबोधहेतुत्वं तोभयवादिसिद्धं तादृ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

सु.
१९

पदानेनपदजन्यविशिष्टोपस्थितीनां शाब्दधीहेतुताकल्पनमपेक्ष्य विभक्तिजन्यसंख्योपस्थितीनामल्पानां।
तत्कल्पने लाघवात् इदं पुनरिहावधेयं विभक्तेः संख्याबोधकत्वे समानविषयकानुमित्यादिकं प्रतिएका
त्वसामग्रीप्रतिबंधकतायां प्रातिपदिकजन्याघटाद्युपस्थितिर्विभक्तिजन्यासंख्योपस्थितिः प्रवेष्टव्या तयो
स्तुल्ययोर्विशेषणविशेष्यभावे विनिगमनाविरहात्प्रतिबंधकताबाहुल्यं प्रकृते विशिष्टलाक्षणिकत्वे
तदुभयस्थानीया विशिष्टविषयकोपस्थितिरेकैव सामग्र्यामंतर्भवतीति लाघवं न च विशिष्टविषय
कोपस्थितेरपि एकत्वादिप्रकारतानिरूपितघटादिविशेष्यताशालित्वेन घटादिविशेष्यतानिरूपितए।
कत्वादिविषयताशालित्वेन वा प्रवेशनीयात्यया विनिगमनाविरहात्साम्यमिति वाच्यं भवन्मते योग्यता
ज्ञानघटोपस्थित्येकत्वोपस्थितीनां तिसृणां विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबध्य।
प्रतिबंधकभावबाहुल्यं मन्मते तत्र योग्यताज्ञाने विशिष्टविषयकोपस्थितेः प्रत्येकं दर्शितोभयरूपेण।
वैशिष्ट्यं निवेश्यते इति द्वयं न प्रत्येकं तादृशरूपद्वयावच्छिन्नायामुपस्थितौ योग्यताज्ञानस्य वैशिष्ट्य
विवेशश्च द्वयमिति तच्च तु द्वयमात्रमिति रीत्याऽस्माकमल्पतरतत्कल्पने महाल्लाघवं एतादृशरीत्ये
वच प्रणमतीत्यादौ प्रकर्षविशिष्टं नतिं धातूनामेवार्थः प्रादयो द्योतका एव न तु प्रकर्षादिवाचका इ।
ति सर्वानुमतः पंथा परिष्कर्तुं शक्यते अन्यथाऽनेन धातुजन्यप्रकर्षादिविशिष्टतत्तत्स्वार्थोप।
स्थितीनां शाब्दधीजनकतामपेक्ष्य कतिपयोपसर्गाधीनप्रकर्षाद्युपस्थितीनां तज्जनकताक १९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

ल्यनैलाघवात् स्वादीनामिव प्रादीनामपि वाचकत्वानिराबाधात्सिद्धे नेति संख्यायाश्च प्रकृत्यर्थैकपर्या
प्तिसंबंधेनैव विशेषणत्वं न तु समवायादिना तथा सति एकव्यक्तिमात्रपरदाकाशशब्दादपि द्वित्वब
नबहुवचनाद्यापत्तेः तत्तदर्थयोर्द्वित्वबहुत्वयोः समवायादिनाकाशाद्यन्वययोग्यत्वात् नच प
र्याप्तेः संसर्गत्वेपि तद्बोधतात्पर्यस्य घटाकाशादौ द्वित्वादेः पर्याप्तिसत्वेपि प्रत्येकमाकाशादौ तत्प
र्याप्तिर्नास्तीति वक्तुमशक्यत्वात् प्रत्येकस्योभयानतिरिक्तत्वादिति वाच्यं उद्देश्यतावच्छेदकव्याप्यत्व ।
विशिष्टपर्याप्तेरेव संसर्गतोपगमात् आकाशत्वादिव्यापकतयापि द्वित्वादिपर्याप्तावसत्वेनातिप्रसंगा ।
विरहात् वैशिष्ट्यं चवैज्ञानिकेन तु वाच्यत्वं तेन यत्र योग्यताभ्रमजन्यः अत्राकाशावित्यादावाका ।
शादिविशेष्यकद्वित्वादिप्रकारकः शाब्दबोधस्तत्र विशिष्टसंसर्गाप्रसिद्धावपि न क्षतिः द्वित्वादिपर्या ।
प्तावन्यत्र प्रसिद्धस्याकाशत्वादिव्यापकत्वस्यांशे तत्त्रोपगमात् संबंधतावच्छेदकोंशे भ्रमत्वस्यान्यत्रो
पकादितत्वात् नैव प्रकृत्यर्थतावच्छेदकव्यापकतासंबंधेन द्वित्वान्वयधीः किं तु पेयत इति वाच्यं ।
घटावित्यादौ घटत्वादीनां स्वरूपतएवोपस्थितत्वात् तत्रेतरान्वयबोधासंभवात् स्वव्यापकीभूतो द्वि ।
रूपतावच्छेदकत्वस्वरूपं वा पर्याप्त्या एवं प्रकृत्यर्थे द्वित्वादेः संबंधत्वेच व्यापकतास्वरूपसंबंधतावच्छेदकों ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

केऽप्यमतत्त्वस्वीकारस्यावश्यकत्वात् उद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेः संसर्गतो वेद्यतानिर्वाज्ञा
मु॰ दी॰ व्याप्यत्र व्याप्तिर्व्यापकसामानाधिकरण्यरूपैव वाच्या न तु तद्रूपस्यापि वृत्तित्वरूपा केवलान्वयिधर्मस्य प्र
२० वृत्त्यप्रतियोगितावच्छेदकत्वं यत्र तत्राप्रसिद्धेः एवं चोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्त्यपेक्षया लघोः स्व
व्यापकताद्वयस्याभावमेव तत्त्वस्यैव संबंधत्वमुचितमिति चेन्न हि घटाकाशयोर्न द्वावित्यादिवाक्यजन्यशाब्दबोध
दशायामघटाकाशत्वावित्यादिवाक्याद्द्वित्वबोधापत्तेः तस्माद्धि घटाकाशयोर्न द्वावित्यादितो द्वित्वावच्छिन्न
का भेदः प्रतीयते स च न स्वव्यापकीभूतत्ववत्त्वादिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकः तादृशसंबंधेन
द्वित्ववतोऽप्रसिद्धेः अपि तु पर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताक एव तत्ज्ञाने न च पर्याप्तिसंबं-
परंपरा धेन द्वित्वविशिष्टबुद्धिरेव प्रतिबध्यते न तु स्वसंबंधेन तद्विशिष्टबुद्धिरपीति घटाकाशयोर्न द्वावित्यादिस्थ-
ले केवलपर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकभेदो न ज्ञानबोधयितुं न शक्यते घटाकाशयोः पु-
नः पृथक्त्वाद् द्वित्वपर्याप्तेः सत्वेन तत्र तेन संबंधेन तद्भेदस्यावश्यमशक्यत्वादाकाशत्वव्यापकपर्याप्तिसं-
बंधावच्छिन्नप्रतियोगितावच्छेदकताकद्वित्वादिमद्भेदस्याप्रसिद्धेरेवेति चेन्न द्वित्वादिपर्याप्तेरुभयादि-
वृत्तिधर्मैर्नैवावच्छेदात् तदनवच्छेदकैकमात्रवृत्तिधर्मावच्छेदेन तद्भेदस्य तेन संबंधेन द्वित्वादिमतो
भेदस्य च तद्वृत्तिवृत्तेर्बाधकाभावात् न चैवं घटपटौ न द्वावित्यपि प्रयोगः स्यादपद्येत घटपटयो-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

रविषयत्वे केहेतुत्वावच्छिन्नभेदसत्त्वादितिवाच्यं हेतुवचनाद्युपस्थाप्यहेतुत्वाद्यवच्छेदेनहेतुत्वाद्यव-
च्छिन्नभेदस्यबाधेनतादृशप्रयोगाभावोपपत्तेः नञाख्यातस्यहेतुत्वधर्मावच्छिन्नप्रतियोगिताक-
भेदः उद्देश्यतावच्छेदकावच्छेदेनैव बोध्यत इतिव्युत्पत्तेर्हेतुत्वसामानाधिकरण्येन तदभावस्याकिं-
चित्करत्वात् नैवघटत्वादेरतिप्रसक्ततया हेतुत्वादिपर्याप्तेरनवच्छेदकत्वात्तदवच्छेदेनहेतुत्ववद्भेद-
स्यभवतामप्यनुमतत्वात्स्वहेतुत्वपर्याप्तैकत्वाविवक्षायां घटोनहेतुरितिप्रयोगापत्तिरितिवाच्यं
तादृशप्रयोगाभावे घटत्वादेर्हेतुत्वस्येव हेतुत्वादिमद्भेदस्याप्यनुयोगितावच्छेदकतायाः प्रामा-
णिकत्वात् प्रतियोगितावच्छेदकानवच्छेदकतायाभेदावच्छेदकतानियतत्वासिद्धेः अस्तुवाति-
प्रसक्तोपि घटत्वादिर्हेतुत्वपर्याप्तेरवच्छेदकः घटावित्यादिप्रतीतिबलात् वस्तुतस्तु घटत्वादेः
प्रत्येके हेतुत्वपर्याप्त्यनवच्छेदकत्वेपि हेतुत्वपर्याप्तित्वावच्छिन्नानतिप्रसक्ततया तदवच्छिन्नाव-
च्छेदकत्वमव्याहतमेव अथपर्याप्त्याख्यः विलक्षणसंबंधएववासामानाधिकस्तत्त्वकपं तत्संबंधता-
श्राकाशोनहेतुरितिप्रतीतिस्तु समवायसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकभेदविषयकैवा-
त्ता श्राकाशादौ हेतुत्वादिसमवायसत्त्वेपि हेतुत्वादेरेव उभयादिवृत्तिधर्ममात्रानुयोगितावच्छे-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

मु॰ वा॰ २१

दकत्वोपगमात् तदनवच्छेदकाकाशत्वाद्यवच्छेदेन समवायादिसंबंधेन तद्वृत्तो भेदस्य वृत्तौ बाधकाभावा-
दिति चेन्न आकाशावित्यादिवाक्यजन्यशाब्दबोधस्याप्रमात्वान्यथानुपपत्त्यैव तादृशसंबंधासिद्धेः तादृ-
शबुद्धेः समवायविषयकत्वे प्रमात्वनिराकरणस्याशक्यत्वात् उद्देश्यतावच्छेदकव्याप्तिविशिष्टसमवा-
यस्य संसर्गतोपगमे घटावित्यादिवाक्यस्याप्यप्रमाणतापत्तेः समवायस्यैक्येन घटादिनिष्ठस्य द्वित्वा-
दिसमवायस्य घटादावपि सत्त्वेन घटत्वाद्यव्याप्यत्वात् न चोद्देश्यतावच्छेदकव्याप्यद्वित्वादिसमा-
वायत्वेनैव संबंधता तत्तु द्वित्वादिसमवायस्य घटत्वाद्यव्याप्यत्वेपि द्वित्वादेस्तद्व्याप्यतया न घटावित्या-
देरप्रामाण्यमिति वाच्यं एवं सति तथाविधद्वित्वादेरेव लाघवेन द्वित्वादिसंबंधतौचित्यात् अपृथक्त्वेव मे-
व तावतापि पर्याप्तिसंबंधस्याविलयादिति चेन्न द्वित्वादिस्वरूपस्यैव द्वित्वादिपर्याप्तिरूपाभिमतसिद्धेः
उक्तं च दीधितिकृता पर्याप्तिश्चायमेको घट इमौ द्वावित्यादिप्रतीतिसाक्षिकः स्वरूपसंबंधविशेष इति ।
समवायस्य नानात्वमतेपि द्वित्वादिसमवाय एव तत्पर्याप्तिर्न तु स्वरूपमतिरिक्तपदार्थो वेत्यन्यदेतत् ।
यत्तु आकाशे न द्वे इत्यादिप्रतीतिवदाकाशं न द्वित्ववदिति प्रतीतेः प्रमात्वस्य वारणाय समवायेन द्वि-
त्वादिमद्भेद आकाशत्वावच्छेदेन न स्वीकर्तव्यः तथा च पर्याप्तेरविलक्षणत्वे आकाशे न द्वे इत्यादिप्रती-
तेरप्यप्रमात्वापत्तिरिति तन्न आकाशं न द्वित्ववदिति प्रतीतौ हि द्वित्वसमवायावच्छिन्नभेदस्यैव विषयः

२१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

मतुपा संबंधमूलत्वेत्वात् न तु द्वित्वाद्यवच्छिन्नभेदः एवं चाकाशत्वाद्यवच्छेदेन द्वित्वाद्यवच्छिन्नभेद एव स्वीक्रियते ननु

तत्संबंधावच्छिन्नः स्याकाशं न द्वे इति प्रतीतेरप्रमात्वस्याकाशं न द्वित्ववदिति प्रतीतेर्वाप्रमात्वस्य न प्रसंगः इति चे

योद्देश्यतावच्छेदकत्वाव्यवपर्याप्तेर्द्वित्वादिसंबंधत्वे धवखदिरौ द्विनत्तौ स्यातां उद्देश्यतावच्छेदकीभूतधवत्वखदिर

त्वादिव्याप्यद्वित्वादिद्वयमेव प्रत्येतव्यं न तु धवखदिरादिपर्याप्तद्वित्वादिकं तथा चैकैकधवखदिरादितात्पर्येण न

प्याप्रयोगानुपपत्तिरिति द्वित्वान्वयितावच्छेदकं स्वपर्याप्ताबुद्धिविशेषविषयत्वादिरूपमुभयादिनिष्ठं स्याद्द्वित्वं तद्रूप

मात्साध्यौ वाच्यं तत्र चामीमांसकमतप्रवेश इति चेन्न यत्रैकधर्मस्य द्वित्वाद्युद्देश्यता तत्रैवोद्देश्यतावच्छेदकव्या

प्तिविशिष्टपर्याप्तेः संसर्गतानियमः यत्र धर्मद्वयादेस्तत्त्वं तत्र केवलापर्याप्तेः समवाय एव वा संसर्गः इत्युपगमात्

द्वित्वेनैव साद्वित्वस्यान्वयितावच्छेदकता एकैकतात्पर्येण धवखदिरा द्वित्वादि प्रयोगोपपत्तेः नैवैवमेकैकधवखदिरता

त्पर्येण धवौ खदिरा द्वित्वादि प्रयोगापत्तिः तादृशाकाङ्क्षारूपविषयकसमूहालंबनजन्यसमूहालंबनशाब्दबुद्धे

र्नानाधर्मावच्छिन्नोद्देश्यताकतया प्रवृद्धपर्याप्तेरपि संसर्गतयाऽवगाहनसंभवादिति वाच्यं यत्र नानाधर्मावच्छिन्न

विशेष्यतानिरूपितात्मका द्वित्वादिप्रकारता तत्रैव शुद्धायाः पर्याप्तेः समवायस्य वा संसर्गतया भानात् धवौ खदि

रा द्वित्वादिनानाकाङ्क्षाजन्यसमूहालंबनशाब्दबोधे विशेष्यताभेदेन प्रकारताभेदादुद्देश्यतावच्छेदकधवत्वादि

व्याप्तिविशिष्टपर्याप्तेः संसर्गतानियमेन एकैकधवखदिरादितात्पर्येण तथा प्रयोगासंभवात् धवखदिरा द्वित्वा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

द्विसमासोत्तरद्विवचनेन धवत्वखदिरत्वाद्यवच्छिन्ननानाविशेष्यतानिरूपितैकद्वित्वादिप्रकारताशालिज्ञानमेव जन्य
सु·वा· ते तादृशवाक्यजन्यबोधस्य समूहालंबनात्मकतया विशेष्यताभेदेन प्रकारताभेदाभावात् यथाहि समूहालं-
२२ बनात्मके दंडी चैत्रः कुंडली त्याकारक नानाविशेष्यकैकविशेषणकज्ञाने नानाप्रकारतानिरूपितैकावि-
शेष्यता तथा तथाविधे धवखदिरौ द्वित्याकारके नानाविशेष्यकैकविशेषणकज्ञाने विशेष्यताभेदेप्यभिन्नै-
व द्वित्वादिप्रकारता अन्यथा समूहालंबनत्वं न तत्तद्वैलक्षण्यानुपपत्तेः समासघटक धवखदिरादिपदानां एकवाक्य-
तानुपपत्तिश्च तत्तद्योग्यविषयतया साक्षात्परंपरया वा निरूपिता या विषयता तत्प्रयोजकत्वस्यैव तदेकवाक्यता-
पदार्थत्वात् न चैतादृशैकवाक्यताविरहेपि द्वंद्वविरहः तथा सति समासस्यैवानुपपत्तिः अयमेति पुत्रो राज्ञः पुरु-
षोपसार्यतामित्यादौ राजपदपुरुषपदादीनां समासवारणाय समर्थपदानामेव समासानुशासनात्सामर्थ्यस्य
विरहैकवाक्यतारूपत्वात् जलपृथिव्योः स्नेहगंधावित्यादितोपि न जले स्नेहः पृथिव्यां गंध इत्याकारकसमूहा-
लंबनो बोधः किंतु तद्वैलक्षण्यो द्वित्वादिनिष्ठैकप्रकारतानिरूपितजलत्वपृथिवीत्वाद्यवच्छिन्नविशेष्यताद्वया-
त्मकप्रकारताद्वयनिरूपिताधेयत्वप्रकारतानिरूपितयद्धर्मितावच्छेदकद्वित्वादिनिष्ठैकप्रकारतानिरूपके स्नेहत्व-
गंधत्वाद्यवच्छिन्नविशेष्यताद्वयं तज्ज्ञानमिति अतो न कुत्राप्येकवाक्यताभंगः चैत्रो मैत्रश्च गच्छत इत्यादावप्येता-
दृशद्वित्वादिप्रकारेणाभासमाने चैत्रमैत्रादौ गमनाद्याश्रयत्वाद्यन्वयेन निरुक्तैकवाक्यतासंभवेपि समासविधे-
र्विभाषाधिकारीयत्वाद समासः तत्र विशेष्यताभेदभिन्नद्वित्वनिष्ठप्रकारताद्वयप्रतियोगी समूहालंबनात्मा- २२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

कबोध इति तु न सम्यक् तथा सत्युक्तयुक्त्या एकैकचैत्रमैत्रादितात्पर्येण न तथा प्रयोगानुपपत्तेः आख्यातोपस्थापितन
द्वित्वादिकं चोभयादिरूपान्वयितावच्छेदकावच्छिन्न एवान्वेतीति व्युत्पत्तिः तेनोक्तप्रयोगदर्शनात् क्रियापदस्य
विशेष्यवाचकपदसमानवचनत्वनियमेपि घटद्रव्यादितात्पर्येण घटस्तिष्ठत इत्यादयो न प्रयोगाः एकवचनान्ते
क्रियापदे च तादृशविशेष्यवाचकपदप्रयोग एव साधुरतो घटास्तिष्ठतीत्यादयो न प्रयोगाः अत एव घटादिव्यक्ते
स्तादृशवृत्तितात्पर्येण घटोस्ति घटाः सन्तीति कथं न प्रयोगाः घटादौ घटत्वादिव्याप्तिविशिष्टपर्याप्तिसंबंधे
न द्वित्वादेस्तादृशवृत्तित्वाश्रयत्वादेरसत्त्वात् न च द्वित्वेनोपस्थितयोर्द्वयोरेव व्यक्त्योरेवं बहुत्वेनोपस्थितासु बहु
षु व्यक्तिषु विधेयान्वयात् व्यक्त्यंतरेषु तादृशवृत्तित्वाश्रयत्वादिबाधान्न तादृशप्रयोग इति वाच्यं व्यक्त्यंतरेऽयोग्यतया
तादृशविधेयान्वयाग्रहेन एकघटे तद्वयाग्रहेनावबोधस्योत्पत्तौ बाधकाभावात् तथा तात्पर्येण तथा प्रयोगस्य दुर्वार
त्वात् न च व्यासज्यवृत्तिधर्मो यत्रान्वयितावच्छेदकस्तत्र यावत्स्वाश्रयान्वयितावच्छेदकपर्याप्तिस्तावतामेव पदार्थानां तेन
न्वय इति व्युत्पत्तिस्तन्निर्वाहाय तादृशधर्मावच्छिन्ने इतरान्वयबोधजनकसामग्र्या उभयादिविषयकपदार्थानां तद
न्वयबुद्धित्वमेव जन्यतावच्छेदकं वक्तव्यमिति द्वित्वादिनैकघटादिमात्रविषयकैतादृशवृत्तित्वाद्यन्वयबोधो न संभ
वतीति न तादृशबोधतात्पर्येण तादृशप्रयोगापत्तिरिति वाच्यं योग्यताभ्रमे एककाप्रणवत्रस्त इत्यादिवाक्यात् द्वित्वादिना
एकव्यक्तिमात्रविषयकपदार्थान्तरान्वयबोधात् तादृशव्युत्पत्तेस्तन्निर्वाहककार्यकारणभावस्य च कल्पनासंभवा
त् घटद्वित्वाद्यवच्छिन्नोद्देश्यताकबुद्धावुद्देश्यतावच्छेदकव्यापकतानियमतो विधेयसंसर्गे मास्तु इति व्युत्पत्तिः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

यत्र चोद्देश्यतावच्छेदकविशिष्टाधिकरणाप्रसिद्ध्या व्यापकत्वमप्रसिद्धं तत्रापि खंडशः प्रसिद्धानां तद्घटकपदार्था-
व्यु॰ वा॰ २३ नां विशेष्यविशेषणभावापन्नानां भानसंभवान्न पीतशंखो वह्निरित्यादौ तादृशव्युत्पत्तिभंगः एवं चैकघट-
टादिव्यक्तिमात्राधिकरणपरस्यात्र घटोऽस्तीत्यादिवाक्यस्याप्रामाण्यं स्याद्घटमेव उद्देश्यतावच्छेदकीभूतघटमात्र-
वृत्तित्वव्यापकतायास्तादृशवाक्यप्रतिपाद्याया विधेयसंसर्गे बाधादिति तदपि तुच्छं अत्र घटोऽस्तीत्यादौ द्वि-
त्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य द्वित्ववद्घटनिष्ठाभावप्रतियोगितानवच्छेदकत्वस्य च
तदधिकरणवृत्तिघटान्तरनिष्ठाभावप्रतियोगितावच्छेदकीभूते तत्तद्विधेयसंसर्गतावच्छेदके बाधात् घटद्वया-
धिकरणपरतादृशवाक्यस्याप्रामाण्यापत्तेः तत्तद्द्वित्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य
उक्तविधेयसंसर्गतावच्छेदके सामान्योपगमस्तु न संभवति तत्तद्द्वित्वत्वेनानुपस्थितेः न च तदवच्छिन्नस्य संसर्गतया
भाने तेन रूपेणोपस्थितिर्नापेक्ष्यत इति वाच्यं तत्संसर्गतावच्छिन्नतत्प्रकारतानिरूपिततत्तद्विशेष्यताशालिशाब्द-
बोधं प्रति तत्प्रकारकतात्पर्यज्ञाने संसर्गांशे विशेषणतया तद्ज्ञाननिर्वाहाय संसर्गघटकपदार्थोपस्थितेरपि शा-
ब्दबोधं प्रति कारणत्वावश्यकत्वात् प्रकृते तत्संसर्गैकदेशपदार्थविशिष्टपरपदार्थबोधपरत्वज्ञानस्य प्रकृतेन वाक्यार्थे वि-
षयकतया प्रागसंभवेन उपदर्शिततात्पर्यज्ञानस्यैव प्राग्बुद्धिहेतुत्वोपगमात् एवं वाक्यार्थघटकसंसर्गस्यानु-
नुगमेन अत्र घटोऽस्तीत्यादौ वाक्याभेदप्रसंगाच्च अत्रोच्यते व्यासज्यवृत्तिधर्मावच्छिन्नोद्देश्यताक[illegible]स्थले शाब्द-
बुद्धौ स्वव्याप्यतादृशधर्मवत्त्वमपि विधेयसंसर्गतया भासत इति व्युत्पत्तिः व्याप्यत्वं च तद्वदन्यावृत्तित्वं व्यति-
रेकि विधेयकस्थले तादृशधर्मवत्त्वं च उद्देश्यतावच्छेदकताघटकसंबंधेन बोध्यं अत्र घटौ स्त इत्यादौ एतद्दे-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

णावर्तमानत्वादिरूपविधेयस्य तद्वृत्त्यावृत्तित्वरूपव्याप्तिमत्त्वैतद्देशस्थैकघटादिव्यक्तिमात्राधिकरणत्वे घटघटादि-
निष्ठवृत्तित्वमेव घटत्वव्याप्यपर्याप्तिरूपो द्रष्टव्यतावच्छेदकता घटकसंबंधावच्छिन्नतद्वृत्तित्वं च घटादौ बाधितमिति ता-
दृशवाक्यस्याप्रामाण्यं अधिकरणस्य घटद्वयादिमत्त्वे च घटत्वादिव्याप्यवृत्तित्वमेव तथैवेति घटत्वादिव्याप्यपर्या-
प्तिसंबंधेन तद्वृत्तित्वं घटादावबाधितमिति तादृशवाक्यस्य प्रामाण्यनिर्वाहः केवलान्वयिविधेयकस्थले च वृत्ति-
त्वत्वाद्यवच्छिन्नव्यापकत्वमेव संसर्गघटकं केवलान्वयिनि तादृशव्यापकताया अव्याहतत्वात् ननु तन्न वृत्ति-
घ त्वत्वावच्छिन्नव्यापकत्वमिति न पूर्वोक्तदोषावकाशः घटानानयति चैत्र इत्यादौ चैत्रकर्तृकानयनकर्मता-
दिव्याप्यवृत्तित्वादिमन्निष्ठनिरूपकताकाधेयत्वादिसंबंधेन कर्मत्वादौ घटादेरन्वयो व्युत्पन्नः तेन चैत्राद्या-
वेकघटादिव्यक्तिमात्रानयनकर्तृत्वेन तादृशप्रयोगः वृत्तित्वादिमत्त्वे च प्रकारतावच्छेदकीभूतघटत्वादिव्याप्य-
पर्याप्तिसंबंधेन बोध्यं तेन चैत्रस्य घटादिसहितैकघटादिव्यक्त्यानयनकर्तृत्वेपि न तादृशप्रयोगः एवमन्यत्रा-
प्यूहनीयं यत्रानेकवृत्तिधर्मो वृत्तित्वान्वयितावच्छेदकतया भासते तत्रोभयादिनैव समं पदार्थान्तरान्वयः य-
त्रैकमात्रवृत्तिस्तथात्रैकेनापीति व्युत्पत्तिभेदावलंबनात् कार्यकारणभाववैचित्र्याच्च सर्वं समंजसमित्य-
पि वदंति अत्र च घटादिव्यक्तिभेदेनानयनकर्मताभिन्नैवेति प्रतिसंधानस्य पुंसो घटानानयतीति वाक्यात् प्रा- ६
दृशबोधानुपपत्तिः तस्य कर्मतात्वावच्छेदेनाधेयतासंसर्गावच्छिन्नप्रतियोगिताकस्य वृत्तित्वाद्यवच्छिन्नघटा-
द्यभावस्यानिश्चयसंभवात् तस्य वृत्तित्वादिना तादृशसंसर्गकघटादिविशिष्टधीविरोधित्वादिति चेन्न उभया-
त्वावच्छिन्नाभाववत्ताज्ञानमुभयत्वावच्छिन्ननिरूपिताधेयतासंसर्गावगाहिज्ञानमेव प्रतिबध्नाति न तु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

प्र॰ वा॰ २४

केवलत्वे विशेष्ये विशेषणमिति रीत्या जायमानमुभयत्वादिविशिष्टज्ञानं अतो विशेषदर्शिनो तादृशवाक्याद्वा
धेयतांशे उभयत्वाद्यवच्छिन्ननिरूपितत्वावगाहि भ्रमात्मकं ज्ञानं भवत्येव अपि तु तदंशे तदनवगाहिप्रमा
त्मकं ज्ञानमिति उभयत्वाद्यवच्छिन्ननिरूपिताधेयत्वं च उभयादिवृत्तावेकैकधर्मं एवं न तु प्रत्येकमात्रवृत्ता वि
ति कर्मत्वांशे तादृशाधेयत्वावगाहिज्ञानस्य भ्रमत्वमित्यवधेयं संख्याश्च प्रकृत्यर्थतावच्छेदकगताः क्वचित्
प्रतीयंते यथा संपन्नो व्रीहिः संपन्नौ व्रीहियवावित्यादौ एतत्तत्त्वं प्रागेवाभिहितं विरुद्धसंख्यावच्छिन्नवा
चकशतादिपदोत्तरविभक्त्युपस्थाप्याया च संख्या प्रकृत्यर्थतावच्छेदकसंख्यायामेवान्वेति यथा शतमेकं द्वे
शते त्रीणि शतानीत्यत्र शतत्वादौ वेकत्वद्वित्वबहुत्वानामन्वयः अत एव चैकशतद्विशतत्वादितात्पर्येण
न शतानीति प्रयोगः तत्र प्रकृत्यर्थस्य शतस्य बहुत्वान्वययोग्यत्वेपि प्रकृत्यर्थतावच्छेदकशतत्वांशे बहु
त्वान्वय एव बहुवचनस्य साकांक्षत्वात् तत्र च योग्यताविरहात् न चैकशतेपि नानापुरुषीयापेक्षाबुद्धिज
न्यनानाशतत्वसंभवात् एकशतनिष्ठशतत्वेपि बहुत्वान्वययोग्यतास्त्येवेति वाच्यं परस्परसमानाधि
करणद्वयावृत्तिबहुवचनार्थत्वात् तादृशबहुत्वस्य चैकशतादिवृत्तिनानाशतत्वादौ बाधात् अथवा तत्रा
पि बहुत्वमेव बहुवचनार्थः परस्परसमानाधिकरणद्वयावृत्तिपर्याप्तिरेवाकांक्षानिरूपकः संबंधः यत्तु
द्वे शते त्रीणि शतानीत्यादौ संख्यैव शतादिपदार्थः ननु संख्येयं संख्येयमस्ततरपर्यंत्वे विंशत्याद्याः सदैक
त्वे सर्वाः संख्येयसंख्ययोरित्यनुशासनविरोधात् द्विवचनादिसाधुत्वानुपपत्तेः गवां शतानीत्या
दौ षष्ठ्यर्थान्वयानुपपत्तेश्च न चाभेदः षष्ठ्यर्थः तथा सति ब्राह्मणा दशेत्यत्र ब्राह्मणानां दशेत्यपि

न २
शि न २

२४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

स्यात् अस्माकं चाद्यन्तः संख्यासंख्येयेवं तेते अन्तं परं हे संख्याने संख्येयेचेत्यनुशासनात् द्व्यादिशब्दानां शतादिशब्दा-
नां संख्यानार्थकत्वाभावात् द्व्यादिसंख्यायाः पदार्थतावच्छेदकत्वेन तत्र बहुत्वार्थसंबंधान्वयासंभवान्न तथा प्रयो-
गः इति नदूषणम् न वा शतं द्रव्याणीत्यादौ शतादिपदार्थस्य संख्यापादानादिकर्मत्वान्वययोग्यत्त्वयाप्रामाण्यानुप-
पत्तिः न वा शतं भुक्तमित्यादौ संख्यायां प्रयुक्तायां अभेदान्वययोग्यताविरहात् तदनुपपत्तिश्च तस्माद्द्व्यादिशब्दा-
इव शतादिशब्दा अपि संख्यावच्छिन्नवाचका एव न तु धर्मिविशेषणतानापन्नसंख्यावाचकाः पदार्थैकदेशेपि
संख्यायां स्वप्रकृतिकविभक्त्यर्थसंख्यान्वयस्याकांक्षा तत्तया अन्यप्रकृतिकबहुत्वार्थसंबंधान्वयस्याकांक्षात्तत्तया च।
तेषां संख्यानार्थकताप्रवादः ननु द्व्यादिशब्दानां तथात्वे द्व्यादिवाच्यगणतात्पर्येगणवाच्यगणानां दशेत्यादिप्र-
योगविरहादितितेषां संख्येयमात्रवाचिताप्रवाद इति विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः संख्याया-
द्विबहुत्वे स्तः इत्यनुशासनेचोक्तेर्थे तात्पर्यग्राहकं एकद्विबहुशब्देभ्यस्तैकवचनद्विवचनबहुवचनानि चन सं-
ख्याबोधकानि उद्देश्यतावच्छेदकविधेययोरैक्येन एकत्वाद्यन्वये आकांक्षाविरहादिति तदुत्तरं प्रथमाविभ-
क्तिः प्रयोगसाधुतामात्राय नित्यबहुवचनांतेभ्यः अवादिशब्देभ्यः परं प्रथमाबहुवचनमपि क्वचिन्निरर्थक- व
मेव यत्रैकव्यक्तिमात्रतात्पर्येण तादृशशब्दः प्रयुज्यते तत्र बहुत्वान्वये योग्यताविरहात् यत्तु तद्धतगुणादिसा-
धारणबहुत्वस्य तत्रान्वय इति तन्न प्रत्योमनं प्रकृत्यर्थतावच्छेदकव्याप्यपर्याप्तिसंबंधेनैवानेकवृत्तिसंख्या-
त्वा न्वयस्य व्युत्पन्नतया तादृशसंबंधेन तथाविधबहुत्वान्वये योग्यताविरहात् अन्यथा उदासीनघटपटादि-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

मु॰ ना॰ साधारणबहुत्वस्याप्यन्वयसंभवेन तद्गतगुणादिसाधारणबहुत्वानुधावनस्याकिंचित्करत्वादेवमत्र जहत्स्वा
२५ र्थलक्षणया गुणादिसाधारणधर्मावच्छिन्नमेव प्रकृत्यर्थ इति चेन्न हि बहुत्वेन भासमानेषु गुणादिषु विप॰
दार्थान्वयः स्यान्न च तथा वक्ष्यामो द्रव्याणि दारा ग्रहे संतीत्यादिवाक्यानामप्रमाणतापत्तिः गुणादिषु
द्रव्याभेदग्रहे इतित्वादेवाधातमस्वार्थमात्रपरतादृशशब्दानां बहुवचनोत्ततानुपपत्तेश्चेति न किंचिदेतत् ॰
अवादिपदार्थैकत्वद्वित्वान्वययोग्यतासत्वेप्यसाधुत्वादेव तदुत्तरमेकवचनद्विवचने न प्रयुज्येते इति ध्येयं
आख्याते एकवचनस्य संख्यार्थत्वेपि विवदंते ते निष्कर्षानुसारिणः घटोस्तीत्यादौ सुवेकवचनादेव संख्याबो॰
धसंभवात् चैत्रेण दृष्टो घट इत्यादौ स्थलानुरोधेन तस्य तद्बोधकताया आवश्यकत्वात् न चैकवचनत्वे॰
नानुगतेनैवैकत्वप्रकारकत्वात् तिङेकवचनस्याप्येकत्ववाचकत्वमस्त्विति वाच्यं एकवचनत्वस्यैकत्वप्र
कारतावच्छेदकतायाः प्रागेव निराकृतत्वात् अस्तु वा तेन रूपेण तिङेकवचनस्याप्येकत्वे शक्तिः तथापि॰
तज्जन्यैकत्वोपस्थितेः प्रागुक्तबोधोपयोगित्वे मानाभावः नहि सामान्यत एकवचनज्ञानजन्यैकत्वोप
स्थितित्वेन तच्छाब्दबोधे हेतुतासंभवः तथा सत्येकत्वे अगृहीतसुपदवृत्तिकस्य पुंसः सुपदसकृतिघटा
दिपदोपस्थाप्यघटादौ पटादिपदोत्तरामादिपदोपस्थाप्यैकत्वाद्यन्वयबोधप्रसंगात् किंतु सुपदत्वा
दिप्रकारकज्ञानजन्यतदुपस्थितित्वादिनैव तथा सति घटादिपदोत्तरसुपदत्वादिरूपानुपूर्वीविशेष
रूपाकांक्षाज्ञानघटिताया घटादावेकत्वाद्यन्वयबोधस्य सामग्र्याः सुपदत्वादिप्रकारकसंधीजन्योपस्थि २५

त्मा॰

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

नैरेवांनभ्योगात्तादृशप्रत्ययेरनवकाशात् एवंचतिवादिपदत्वप्रकारकज्ञानजन्योपस्थितित्वेनतच्छाब्दबोधहेतुत्वेमा
नाभाव इति पचतीत्यादेः संख्यानभिधायकत्वे चैत्रः पचति तंडुलं चैत्रेण पच्यते तंडुलः इत्यादौ कर्तृकर्मवाच
कपदात् तृतीयाद्वितीययोरापत्तिः कर्तृकर्मसंख्यायाश्चानभिधाने कर्तृकरणयोस्तृतीयेति कर्मणिद्वितीयेति कर्त
सूत्राभ्यांतयोरनुशासनात् नैयायिकमते लकारस्य कर्तृकर्मवाचकतयातदनभिधानस्यतृतीयाद्विती।
यानियामकत्वासंभवात् न च कर्त्रादिगतसंख्यानभिधानमेव कथं कर्त्रादिवाचकपदोत्तरतृतीयादिनियाम।
मकं चैत्रेण पच्यते तंडुलः इत्यादिस्थलेपि लकारस्य चैत्रादिगतसंख्याभिधायकत्वात् एकत्वत्वादिना एकत्व।
सामान्यस्यैवैकवचनाद्यभिधेयत्वादिति वाच्यं यत्तल्लहूतसंख्यानभिधायकत्वं यद्रूपेण तद्रूपसंख्यानिष्ठत्य
निरूपकत्वं अपि तु तद्विशेष्यकसंख्याप्रकारकशाब्दबोधाननुकूलत्वमेव तद्वाचकर्त्रादिविशेष्यकसंख्या।
न्वयबोधाननुकूललकारादिसमभिव्याहृतकर्त्रादिवाचकपदात्तृतीयादयो भवंतीत्यत्र तदनुशासनतात्पर्य।
र्य्यं चैत्रेणौदनः पच्यते इत्यादौ चैत्रादिविशेष्यकसंख्यान्वयबोधकत्वेनाख्यातस्य आख्यातार्थभावनाया
यत्रान्वयस्तद्विशेष्यकसंख्याबोधस्यैवाख्यातेनजननात् तादृशभावनान्वयबोधविशेष्यप्रथमांतप
दोपस्थाप्य एव चैत्रः पचति तंडुलमित्यादौ चैत्रादिः साक्षादेव भावनाविशेष्यः चैत्रेण पच्यते तंडुलः इत्यादौ
तु परंपरया चैत्रनिष्ठभावनाजन्यपाकजन्यफलशालीतंडुलः इत्याकारकबोधस्यतत्रोदयात् तस्मात्तद्वादे
रपि संख्याबोधकत्वमावश्यकमितितन्नविचारसहं तथाहि कर्त्रादिनिष्ठसंख्यान्वयबोधाननुकूलत्वं य।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

दिताद्दृशबोधोपधायकज्ञानविषयत्वाभाववत्त्वेन तदा यादृशातिवादिज्ञानेन सहकार्यन्तरविरहात्तादृशबोधो न
व्यु॰ वा॰ नेति तद्योगे तृतीयाद्यापत्तेः यदि च तादृशबोधस्वरूपयोग्यज्ञानविषयत्वाभावस्तदा पचतादिसमभिव्या-
२६ हृतात्मनेपदादिज्ञानस्यापि तादृशबोधस्वरूपयोग्यत्वात् तत्स्वरूपयोग्यज्ञानाविषयतिवादाख्यातस्ये-
वासिद्धेः अथ कर्त्रादिविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयिता-
निरूपकत्वमेव तत्तद्बोधानुकूलत्वं चैत्रः पचतीत्यादिवाक्यघटकतिवादिविषयिता चैत्रादिविशे-
ष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदिका तादृशान्वयबुद्धित्वावच्छिन्नप्र-
ति चैत्रादिपदसमभिव्याहृततिवादिपदज्ञानत्वेनाकांक्षाज्ञानस्य हेतुत्वाच्चैत्रेण पच्यते तण्डुल इत्यादि-
वाक्यघटकतस्यादिपदविषयिता च न तादृशी चैत्रादिसमभिव्याहृततादृशज्ञानत्वेन तादृशान्वयबुद्धित्वावच्छि-
न्नं प्रत्यहेतुत्वात् न च चैत्रः पचते इत्यादौ चैत्रविशेष्यकाख्यातार्थसंख्यान्वयबोधोत्पत्त्या चैत्रसमभिव्याहृत-
तस्यादिपदज्ञानत्वेनापि तादृशान्वयबुद्धित्वावच्छिन्नहेतुतावत्त्वेवेति चैत्रेण पच्यते इत्यादिवाक्यघटकीभू-
ततस्यादिपदविषयितापि तादृश्येवेति वाच्यं चैत्रेण पचते चैत्रः पच्यते इत्यादिवाक्यान् चैत्रादिविशेष्यका-
स्यभावनायाः संख्यायाश्चान्वयबोधस्यानुदयात्तद्विशेष्यकतदुभयान्वयबोधे यथाक्रमं चैत्रादिपदसम-
भिव्याहृतयगादिविकरणोत्तरततदाख्यातपदज्ञानत्वेन हेतुत्वात् चैत्रेण पच्यते तण्डुल इत्यादिवाक्यघटक-
तस्यादौ नो तादृशसमभिव्याहारादिमत्त्वतया तद्विषयितायाश्च तादृशत्वात् चैत्रः पच्यते इत्यादितः २६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

तंडुलः पच्यते इत्यादि तत्र चैत्रे तंडुलविशेष्यकसंसर्गान्वयबोधो न्यस्या चैत्रः पचति तंडुलं इत्यत्रोभयविशेष्यक
संसर्गान्वयबोधौपयिकसमभिव्याहारज्ञानविषयितायाः तंडुलत्वादेः प्रकारत्वेन कर्तृकर्मणोस्तृतीयाद्वितीय।
योरसमभिव्याहारविषयिनताद्दृशवाक्यं व्युत्पन्नाः प्रयुंजते कर्तरि साक्षात्कर्मणि च दर्शितपरंपरया युगपत्
भावनाविशेषणकान्वयबोधजनकतायामाख्यातस्याव्युत्पन्नतया ताद्दृशवाक्यान्नोभयविशेष्यका
न्वयबोधासंभवात् न चाकांक्षायोग्यतादिसत्त्वात्कथं न ताद्दृशान्वयबोध इति वाच्यं अगत्या एकविधान्व
यबोधे अन्यविधान्वयबोधसामग्र्याः प्रतिबंधकतया स्वयंज्ञानस्य वा प्रतिबंधकत्वोपगमान्न च तंडुलं पच्यते
चैत्रः चैत्रेण तंडुलः पच्यते इत्यादिवाक्यद्वयविषयकसमूहालंबनदशायामपि उभयविधान्वयबोधा
नुपपत्तिरिति वाच्यं ताद्दृशैकविधान्वयबोधे ताद्दृशान्यविधान्वयबोधपरत्वेनागृह्यमाणतथाविधाख्या
तधर्मिकप्रकृतान्वयबोधपरत्वज्ञानस्य हेतुतया चैत्रः पच्यते तंडुल इत्यादिवाक्यात्ताद्दृशद्विविधान्वयबोध
वारणस्य दर्शितवाक्यद्वयात्तदुपपादनस्य च शक्यत्वात् न च तिङ्कर्त्रसंख्यानभिधानस्य तृतीयाद्वितीयानि
यामकत्वे चैत्रेण स्वं दृश्यते चैत्रः स्वं पश्यतीत्यादौ तृतीयाद्वितीययोरनुपपत्तिः कर्त्रादिविशेष्यकान्वयबो।
धोपयिकाकांक्षाज्ञानीयविषयितानिरूपकत्वस्य तत्राख्यातेऽसत्त्वादिति वाच्यं कर्त्रादिपरस्य दाख्यातप।
दयोः समभिव्याहारः संख्यान्वयबुद्धित्वावच्छिन्नप्रयोजकविषयितानिरूपकतत्स्यदेशेन तृतीयादिविभक्ति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

मु.वा.
२८

तिस्यैव नियमो वा नामेन श्चयनस्य ले चैत्रपरत्वपदाख्यातपद्योर्द्वितीयेव तत्तत्पदं चैत्रपदाख्यातपदयोः समभिव्या
हारस्यैव तद्विशेष्यकसंख्योन्वयबोधप्रयोजकतया क्रमेण चैत्रपदत्वपदाभ्यां तृतीयाद्वितीययोरनुपपत्त्यन
वकाशादिति चेत् अनभिहिते इत्यधिकारे कर्तृकरणयोस्तृतीया कर्मणि द्वितीया इत्यनुशासनस्य किं प्रयोजन
मिति वक्तव्यं चैत्रः पचति तंडुलः पच्यते इत्यादौ चैत्रतंडुलपदाभ्यां तृतीयाद्वितीययोः प्रयोगः इति चेत् तर्हि किं मणि
मंत्रादिन्यायेन तादृशानुशासनस्य तथाविधप्रयोगविरोधित्वेन तदभावस्य प्रयुक्तेः स्यात् न चैवं संभवति ।
पचति पच्यते इत्यादिक्रियायोगे कर्तृकर्मवाचकपदानंतरं तृतीयाद्वितीययोः साधुत्वस्य तत्कर्तृत्वादिबोधो ।
पयिकाकांक्षारहितत्वादिरूपस्य शक्तिप्रतिपत्तिः प्रयोजनं तस्येति चेत् तर्हि उक्तनियमपरतयापि न तत्र क्षतिलाभः यथा
श्रुतं तं चैत्रं तंडुलादिपदतत्तदाख्यातपदयोः समभिव्याहारस्यैव चैत्रतंडुलादिविशेष्यकतत्तदाख्यातार्थसंख्या
न्वयबोधप्रयोजकतया चैत्रेण पच्यते तंडुलं पच्यते इत्यादिवाक्यघटकतृतीयाद्वितीयोत्तचैत्रतंडुलादिपदतिङादि
पदयोः समभिव्याहारस्यातथात्वेन तद्घटकतृतीयाद्वितीययोः साधुत्वस्य उक्तनियमाव्यवच्छेद्यत्वात् ।
तस्मात्सुब्व्यमांक्षसाधारणकर्तृत्वकर्मत्वयोः कर्तृकर्मवाचकपदसमभिव्याहृतलकारत्वोक्तिसमासेरन ।
भिधानमेव तृतीयादिनियामकं शेषो समणि भिरत्रैव निर्भरो भिहितः लादीनां तदनभिधायकत्वं च न तदवा
केत्वं तन्निरूपकत्वनिरूपकत्वे वा आख्यातसामान्यस्यापि आख्यातत्वेन तेत्वादिना वा कर्तृत्वादिनिरूपणात् २८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

लक्षणानिरूपकत्वात् कर्तृत्वानभिधायकाख्यातस्यैवाभिहितत्वे तत्तच्छाब्दबोधोपयिकाकांक्षाशून्यत्वमेव तत् ।
दा दा चैत्रेण पच्यते तंडुल इत्याख्यातस्य कर्तृत्वाद्यवाचकत्वेपि तच्छाब्दबोधप्रयोजकाकांक्षाराहित्यं नत्राहतन ।
मेव चैत्रादिपदोत्तरतृतीयायैव कृतित्वादिबोधनसंभवात् तत्र तादृशाकांक्षाया अकल्पनादित्यपि न ।
चैत्रेण पच्यते तंडुल इत्यादौ तृतीयानुपपत्तेः पच्यते चैत्र इत्यत्र चैत्रादौ पाककृतेः केवलाख्यातस्य तत इत्यादिति ।
अप्रमुख्यविशेष्यतया तस्या बोधकतादृशाख्यातधात्वोरानुपूर्वीविशेषरूपाकांक्षायाः कृतिबोधो ।
पयिकत्वात् न च समभिव्याहाररूपाकांक्षैव विवक्षणीया प्रकृते प्रकृतिप्रत्यययोः आनुपूर्वी आकां
क्षानन्तु समभिव्याहार इति नोक्तदोष इति वाच्यं तथा सति चैत्रेण पचतीत्यादावपि तृतीयायाः साधुता
पत्तेः तादृशचैत्रपदाख्यातपदयोः समभिव्याहारस्य कृतिबोधानौपयिकत्वात् चैत्रेण विजेष्यते ।
मैत्र इत्यादौ तृतीयानुपपत्तेश्च विजेष्यते मैत्र इत्यादितः कृतिबोधाज्ञानात् तादृशाख्यातमैत्रपदयोः सम ।
भिव्याहारस्य कृतिबोधौपयिकत्वात् किंतु तत्तात्पर्यकत्वमन्यत्वमेव तत्तथा च चैत्रेण पच्यत इत्यादौ आ
ख्यातस्य कर्तृत्वादितात्पर्यकत्वे तृतीयायाः साधुत्वेव चैत्रेण पचतीत्यादौ आख्यातस्य तात्पर्यो विव ।
क्षायां तृतीयायाः साधुत्वेपि परस्मैपदस्यासाधुत्वान्न तादृशप्रयोगः परस्मैपदस्य साधुत्वं च धात्वर्थवि
शेष्यस्य प्रत्ययेनाविवक्षणे भावकर्मणोरिति सूत्रेण लनेपदनियमात् आख्यातार्थाविवक्षायां न चै ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

त्रेण पच्यते इत्यादिप्रयोगाः प्रावादिविकरणस्यासाधुत्वात् कर्तृत्वतात्पर्यकसार्वधातुकप्रयोग एव तत्साधुत्वात्
सु॰ वा॰ कर्तृत्वकर्मत्वोभयतात्पर्येण चैत्रः पच्यते तण्डुल इत्यादयस्तु न प्रयोगाः तदेकतरबोधे ऽन्यपरत्वेनागृह्य-
२८ माणस्याख्यातधर्मिकप्रकृतान्वयबोधपरत्वज्ञानस्य हेतुत्वात् चैत्रेण पच्यते तण्डुल इत्यादौ कर्तृत्वाद्याख्या-
तस्य तात्पर्यं न हि कर्मत्वाद्यन्वयबोधोपि न भवत्येव अथ पक्वानि भुंक्ते चैत्रः ओदनः पक्वो भुज्यते इत्यादौ
कृतां क्रमेण कर्तृकर्मत्वानभिधानात् चैत्रपदोदनपदाभ्युत्तरं तृतीयाद्वितीये कथं न स्यातां न च कृतान-
भिधानेपि आख्यातेन तदभिधानात् अनभिहिते समभिव्याहृतपदाभिहितत्वसामान्याभावस्यैवानभिहि-
तपदेन विवक्षणात् समभिव्याहृतेति करणात् चैत्रेण गम्यते ग्रामस्तत्र मैत्रो (पि) गच्छतीत्यादौ न तृतीया-
द्वितीययोरनुपपत्तिः गच्छति गम्यते इत्याद्याख्यातस्य तत्पदाद्यसमभिव्याहृतत्वादिति वाच्यं तथा स-
ति भुञ्जानेन चैत्रेण पच्यते भोक्तव्यमोदनं पचतीत्यादौ तृतीयाद्वितीययोरनुपपत्तिः कृता कर्तृत्व-
कर्मत्वयोरभिधानात् कृता तत्र भोजनकर्तृत्वतत्कर्मत्वयोरभिधानेपि पाककर्तृत्वतत्कर्मत्वयोर- न
हे भिहितमिति चेन्न हि प्रकृतेपि तदनभिहितमेव न च प्रधानक्रियानिरूपितकर्तृत्वाद्यनभिधाने तृतीया-
देः साधुतेति तद्रूपप्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत् प्रकाशत इति शक्तिः कर्तृत्वादिरि-
ति वाच्यं तथापि चैत्रेण दृश्यमानं घटं मैत्रः पश्यतीत्यादौ ज्ञानभेदेन विषयताभेदाभावाच्चैत्रद- २८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

र्णं न मैत्रे दर्शनो भयनिरूपितविषयत्वरूपकर्मतायाः कृतामिधानात् द्वितीयानुपपत्तिरिति चेन्न तत्प्रातिपदि-
कार्थविशेषणत्वमात्रेण कर्मत्वकर्तृत्वाद्यविवक्षायामेव तदनभिधानपदार्थत्वात् तत्प्रातिपदिकार्थविशे-
षतया कर्मकर्तृत्वादिविवक्षायां द्वितीयादिविभक्तेः साधुत्वमित्यर्थे तात्पर्य्यस्य पर्य्यवसितत्वात् शेषमा-
ख्यातार्थविचारे विवेचयिष्यते इत्यलमत्राधिकेन आख्यातद्विवचनबहुवचनयोस्तु संख्याबोधकत्वमा-
वश्यकं चैत्रो मैत्रश्च गच्छतः चैत्रो मैत्रो देवदत्तश्च गच्छन्तीत्यादौ चैकैकलेकः सुजनेतरविद्वत्ताविकापलसीः का-
मलेषु चैवलामव्यापवादः सधनेषु सर्वदा यशोविधानुः केयर्थलिरवे द्वित्वमित्यादौ च द्वित्वबहुत्वबोधक-
सुपोः भावात् न च तत्र सर्वैकवचनस्यैव द्वित्वबहुत्वादौ लक्षणास्त्विति वाच्यं आनुशासनिकातिरिक्तार्थे सु-
विभक्तेर्लक्षणाया अननुशासनात् अन्यथा चैत्रो मैत्रश्च गच्छत इत्यादावविवक्षेदविलक्षणयैव स्यादिना द्वि-
त्वादिबोधनसंभवात् औजसादिरूपादेर्विस्मृतिहानाद्द्वित्वादिबोधनिर्वाहाय च्छेदस्वि सुपोः सुरित्यादिसू-
त्रेण औजसादिस्थाने स्वाद्यादेशस्य वैयर्थ्यात् चैत्रादिपदोत्तरैकवचनस्य द्वित्वादिलाक्षणिकत्वे तदपकृत्य
र्थमैत्रादिसाधारणद्वित्वादिबोधे चोक्तव्युत्पत्तिविरोधेनानुपपत्तेश्च आख्यातार्थसंख्यान्वयबोधे च स्वस-
मानविशेष्यकत्वस्य भावनान्वयबुद्धिसामग्र्यपेक्षितत्वाभावे नायावाधादिग्रहकाले तत्तात्पर्य्योदितग्रहस्-
मकाले वा उक्तस्थले द्वित्वाद्यन्वयबोधात् भावनायामविशेष्यधात्वर्थे संख्यान्वयबोधाच्च तादृशा-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

सामग्र्याः संख्यान्वयबुद्धित्वावच्छिन्नं प्रति स्वातन्त्र्येणाहेतुत्वात् तदंशे व्यभिचाराख्यातजन्यसंख्योपस्थितियोग्यता-
ज्ञानविरहे षष्ठ्यादिघटितसामग्र्याभावनान्वयाहि संख्यान्वयबोधस्य कदाप्यजननात् संख्यान्वयबोधसाधार-
णभावनान्वयबोधत्वावच्छिन्नं प्रति हेतूनामपि तादृशसामग्र्यघटकत्वेनापत्त्यभावात् न च तादृशाकारणानां भा-
वनान्वयबुद्धित्वे संख्यान्वयबुद्धित्वे वा जन्यतावच्छेदकमस्त्वेयत इत्यत्र विनिगमनाविरहः संख्यामविषयीकृत्या-
पि भावनान्वयबोधस्यानुभवसिद्धत्वात् द्वितीयस्य जन्यतावच्छेदकत्वासंभवादिति दिक्॥ प्रथमागुणादिवाचक-
पदोत्तरद्विवचनबहुवचनयोः कथं द्वित्वादिबोधकता संख्यायाम् गुणत्वेन गुणादौ वाधात् न च तत्र स्वाश्रयस-
मवेतत्वादिसंबंधेन द्रव्यगतं द्वित्वादिकमेव भासत इति वाच्यं एकव्यक्तावपि तादृशसंबंधेन द्वित्वादेः परिस-
माप्त्या एकमात्रतात्पर्येण तत्र द्विवचनाद्यापत्तिरिति चेत् अपेक्षाबुद्धिविशेषविषयत्वमेव तदुत्तरद्वि-
वचनादिना बोध्यते नत्वेकमात्रवृत्तिधर्मस्य प्रकृत्यर्थतावच्छेदकत्वस्थले प्रकृत्यर्थतावच्छेदकव्याप्यत्ववि-
शिष्टपर्याप्तिसंबंधेन प्रकृत्यर्थेऽन्वयेति अन्यत्र तु मुख्यपर्याप्तिसंबंधेनेति नह्युद्वादिस्थले दोष इति।
विदुषां परामर्शः॥ इति व्युत्पत्तिवादे प्रथमाकारकम्॥१॥ ॐ कर्मणि द्वितीयेत्यनुशासनात् कर्मत्वं द्वि-
तीयार्थः तत्र कर्मपदस्य धर्ममात्रपरत्वात् सप्तम्याश्च वाचकतार्थत्वात् कर्मणाश्च न तथात्वं कर्मेति।
नामार्थस्य नामादेरभेदान्वयसंभवेऽपि धात्वर्थगमनादिना तदन्वयासंभवात् गौरवाच्च कर्मत्वं च क्रि-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative